CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

BIBLIOTHECA INDICA:
A
A COLLECTION OF ORIENTAL WORKS
PUBLISHED BY THE
ASIATIC SOCIETY OF BENGAL.
NEW SERIES, NO. 1405

योगशास्त्रम् ।

स्वोपज्ञविवरणसहितम् ।



THE YOGAŚĀSTRA,

With the commentary called

SVOPAJNAVIVARANA.

BY

ŚRÍ HEMACHANDRĀCHĀRYA.

EDITED BY

ÇĀSTRA VIÇĀRADA JAINĀCĀRYA

ÇRĪ VIJAYA DHARMA SŪRI.

FASCICULUS IV.

Calcutta:
PRINTED BY UPENDRA NATHA CHAKRAVARTI, AT THE SANSKRIT PRESS,
No. 5, Nandakumar Chawdhury's 2nd Lane.
AND PUBLISHED BY THE
ASIATIC SOCIETY OF BENGAL, 1, PARK STREET.
1916.

CC-0. Agamnigam Digital Preservation Foundation,Chandigarh

LIST OF BOOKS FOR SALE

AT THE LIBRARY OF THE

ASIATIC SOCIETY OF BENGAL.

No. 1, PARK STREET, CACUTTA,

AND OBTAINABLE FROM

THE SOCIETY'S AGENT, MR. BERNARD QUARITCH,
11, GRAFTON STREET, NEW BOND STREET, LONDON, W.,

*Complete copies of those works marked with an asterisk * cannot be supplied.—some of the Fasciculi being out of stock.*

BIBLIOTHECA INDICA.

Sanskrit Series

Advaitachintā Kaustubha, Fasc. 1-3 @ /10/ each	Rs.	1	14
Aitarēya Brāhmaṇa, Vol. I, Fasc. 1-5 ; Vol. II, Fasc. 1-5 ; Vol. III, Fasc. 1-5, Vol. IV, Fasc. 1-8 @ /10/ each		14	6
Aitereya Lochana.		2	0
Amarkosha, Fasc. 1		2	0
*Aṇu Bhāṣhya, Fasc. 2-5 @ /10/ each		2	8
Anumana Didhiti Prasarini, Fasc. 1 @ /10/-		1	4
Aṣṭasāhasrikā Prajñāpāramitā, Fasc. 1-6 @ /10/ each		3	12
Atmatattaviveka, Fasc. I.		0	10
Açvavaidyaka, Fasc. 1-5 @ /10/ each		3	2
Avadana Kalpalatā, (Sans. and Tibetan) Vol. I, Fasc. 1-10 ; Vol. II. Fasc. 1-10 @ 1/ each		20	0
Bālam Bhaṭṭī, Vol. I, Fasc. 1-2, Vol II, Fasc. 1 @ /10/ each		1	14
Baudhāyana S'rauta Sūtra, Fasc. 1-3 Vol. II, Fase 1-5 @ /10/ each		5	0
Bhāsavritty		0	10
Bhāṭṭa Dipikā Vol. I, Fasc. 1-6 ; Vol. 2, Fasc. 1, @ /10 each ...		4	6
Bauddhastotrasangraha		2	0
Brhaddēvatā Fasc. 1-4 @ /10/ each		2	8
Brhaddharma Purāṇa Fasc 1-6 @ /10/ each		3	12
Bodhicaryāvatāra of Çāntideva, Fasc. 1-6 @ /10/ each		3	12
Cri Cantinatha Charita, Fasc. 1-3		1	14
Çatadūṣaṇī, Fasc. 1-2 @ /10/ each		1	4
Catalogue of Sanskrit Books and MSS., Fasc. 1-4 @ 2/ each		8	0
Çatapatha Brāhmaṇa, Vol I, Fasc. 1-7, Vol II, Fasc. 1-5, Vol. III, Fasc. 1-7 Vol. V, Fasc. 1-4 @ /10/ each		14	6
Ditto Vol. VI, Fasc. 1-3 @ 1/4/ each		3	2
Ditto Vol. VII, Fasc. 1-5 @ /10/		3	2
Ditto Vol. IX. Fasc. 1-2		1	4
Çatasāhasrikā Prajñāpāramitā Part, I, Fasc. 1-17 @ /10/ each... ...		10	10
*Caturvarga Chintāmaṇi, Vol. II, Fasc. 1-25 ; Vol. III. Part I, Fasc. 1-18. Part II, Fasc. 1-10. Vol. IV. Fasc. 1-6 @ /10/ each ...		36	14
Ditto Vol. IV, Fasc. 7-8, @ 1/4/ each		2	8
Ditto Vol. IV, Fasc. 9-10 @ /10/		1	4
Çlockavartika, (English) Fasc. 1-7 @ 1/4/ each		8	12
*Çrauta Sūtra of Çānkhāyana, Vol. I, Fasc. 1-7 ; Vol. II, Fasc. 1-4 ; Vol. III, Fasc. 1-4 ; Vol 4, Fasc. 1 @ /10/ each		10	0
Çrī Bhāshyam, Fasc 1-3 @ /10/ each		1	14
Dāna Kriyā Kaumudī, Fasc. 1-2 @ /10/ each		1	4
Gadadhara Paddhati Kālasāra Vol. I, Fasc. 1-7 @ /10/ each ...		4	6
Ditto Āchārasārah Vol. II, Fasc. 1-4 @ /10/ each		3	2
Gobhiliya Grihya Sutra, Vol. I @ /10/ each		3	2
Ditto Vol. II. Fasc. 1-2 @ 1/4/ each		2	8
Ditto (Appendix) Gobhila Parisista		2	0
Ditto Grihya Sangraha		0	10
Haralata		1	14
Karmapradiph, Fasc. I		1	4
Kāla Viveka, Fasc. 1-7 @ /10/ each		4	6
Kātantra, Fasc. 1-6 @ /12/ each		4	8
*Kūrma Purāṇa, Fasc. 3-9 @ /10/ each		5	10
Kiranavali, Fasc. 1-2 @ /10/ each		1	4
Kradana Pārijāta, Fasc. 1-11 @ /10/ each		6	14
Mahā-bhāṣya pradipōdyōta, Vol. I, Fasc. 1-9 ; Vol. II, Fasc. 1-12 Vol. III, Fasc. 1-10 @ /10/ each		19	6
Ditto Vol. IV, fasc. 1 @ 1/4		2	8
Manuṭīkā Sangraha, Fasc. 1-3 @ /10/ each		1	14
Mārkaṇḍēya Purāṇa, (English) Fasc. 1-9 @ 1/- each		9	6
*Mimāmsā Darçana, Fasc. 10-19 @ /10/ each		6	4
*Mugdhaboodha Vyakarana, Fasc. 1-4 @ /10/ each		2	8

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

समानधार्मिकाणां च सङ्गमोऽपि महते पुण्याय, किं पुनस्तदनुरूपा प्रतिपत्तिः ?। सा च स्वपुत्रादिजन्मोत्सवे विवाहेऽन्यस्मिन्नपि तथाविधे प्रकरणे साधर्मिकाणां निमन्त्रणम्, विशिष्टभोजनताम्बूलवस्त्राभरणादिदानम्, आपन्निमग्नानां च स्वधनव्ययेनाऽप्यभ्युद्धरणम्, अन्तरायदोषाच्च विभवक्षये पुनः पूर्वभूमिकाप्रापणम्, धर्मे च विषीदतां तेन तेन प्रकारेण धर्मे स्थैर्यारोपणम्, प्रमाद्यतां च स्मारणवारणचोदना[1]प्रतिचोदनाऽऽदिकरणम्, वाचनाप्रच्छना[2]परावर्तनाऽनुप्रेक्षाधर्मकथादिषु यथायोग्यं विनियोजनं, विशिष्टधर्मानुष्ठानकरणार्थं च साधारणपोषधशालादेः करणमिति। श्राविकासु धनवपनं श्रावकवदन्यूनातिरिक्तमुन्नेतव्यम्। तत्र ज्ञानदर्शनचारित्रवत्यः शीलसन्तोषप्रधानाः सधवा विधवा वा जिनशासनानुरक्तमनसः साधर्मिकत्वेन माननीयाः। ननु स्त्रीणां कुतः शीलशालित्वम् ?, कुतो वा रत्नत्रययुक्तत्वम् ?, स्त्रियो हि नाम लोके लोकोत्तरे चाऽनुभवाच्च दोषभाजनत्वेन प्रसिद्धाः। एताः खल्वभूमिजा विषकन्दल्यः, अनभ्रसम्भवा वज्राशनयः, असंज्ञका व्याधयः, अकारणो मृत्युः, अकन्दरा व्याघ्राः, प्रत्यक्षा राक्षस्यः ; असत्यवचनस्य, साहसस्य, बन्धुस्नेहविघातस्य, सन्तापहेतुत्वस्य, निर्विवेकत्वस्य च परमं कारणमिति दूरतः परिहार्याः, तत्कथं दानसंमानवात्सल्यविधानं तासु युक्तियुक्तम् ?। उच्यते। अनेकान्त एषः, यत् स्त्रीणां दोषबहुलत्वमुच्यते, पुरुषेष्वपि हि समानमेतत्। तेऽपि क्रूराशया दोषबहुला नास्तिकाः कृतघ्नाः स्वामिद्रोहिणो देवगुरुवञ्चकाश्च

(१) ड—चोदन-। (२) ड—त—परिवर्तना।

State Museum Library Lucknow 5118

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

दृश्यन्ते। तद्दर्शनेन च महापुरुषाणामवज्ञा कर्तुं न युज्यते, एवं स्त्रीणामपि। यद्यपि कासाञ्चिद्दोषबहुलत्वमुपलभ्यते, तथापि कासांचिद् गुणबहुलत्वमप्यस्ति। तीर्थकरादिजनन्यो हि स्त्रीत्वेऽपि तत्तद्गुणगरिमयोगितया सुरेन्द्रैरपि पूज्यन्ते, मुनिभिरपि स्तूयन्ते। लौकिका अप्याहुः—

निरतिशयं गरिमाणं तेन युवत्या वदन्ति विद्वांसः।

तं कमपि वहति गर्भं जगतामपि यो गुरुर्भवति ॥१॥ इति ॥

कांश्चन स्वशीलप्रभावादग्निं जलमिव, विषधरं रज्जुमिव, सरितं स्थलमिव, विषमसृतमिव कुर्वन्ति। चतुर्वर्णे च सङ्घे चतुर्थमङ्गं गृहमेधिस्त्रियोऽपि। सुलसाप्रभृतयो हि श्राविकास्तीर्थकरैरपि प्रशस्यगुणाः, सुरेन्द्रैरपि स्वर्गभूमिषु पुनः पुनर्बहुमतचारित्राः प्रबलमिथ्यात्वैरप्यक्षोभ्यसम्यक्त्वसम्पदः, काश्चिच्चरमदेहाः, काश्चिद्द्वित्रिभवान्तरितमोक्षगमनाः शास्त्रेषु श्रूयन्ते। तदासां जननीनामिव भगिनीनामिव स्वपुत्रीणामिव वात्सल्यं युक्तियुक्तमेवोत्पश्यामः। दुष्प्रसहयात्रिणी नागिलाख्या व्रतिव्रतिनी श्रावकवदपश्चिमा सत्यश्रीः। तत्कथं श्राविकाः पापवदनितानिदर्शनेन दूष्यन्ते ?। तस्माद्दूरेण न परिहरणीयाः, वात्सल्यं चासां करणीयमित्यलं प्रसङ्गेन। न केवलं सप्तक्षेत्र्यां धनं वपन् महाश्रावक उच्यते, किन्त्वतिदीनेष्वपि निःस्वान्धबधिरपङ्गुरोगार्तप्रभृतिषु कृपया केवलया धनं वपन्, न तु भक्त्या। भक्तिपूर्वकं हि सप्तक्षेत्र्यां यथोचितं दानम्। अतिदीनेषु त्वविचारितपात्रापात्रमविसृष्टकल्पनीयाऽकल्पनीयप्रकारं केवलयैव करुणया स्वधनस्य वपनं न्याय्यम्।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

भगवन्तोऽपि हि निष्क्रमणकालेऽनपेक्षितपात्रापात्रविभागं करुणया सांवत्सरिकदानं दत्तवन्त इति । तदेवं भक्त्या सप्तक्षेत्र्यां दीनेषु चातिदयया धनं वपन् महाश्रावक उच्यते । ननु श्रावक इत्युच्यताम्, महाश्रावक इति तु महत्त्वविशेषणं किमर्थमुच्यते ? । श्रावकत्वमविरतानामेकादशव्रतधारिणां च शृणोतीति व्युत्पत्त्योच्यते ; यदाह—

'सम्मत्तदंसणाई पइदियहं जइजणा सुणेइ य ।
सामायारिं परमं जो खलु तं सावयं बिन्ति ॥ १ ॥

श्रद्धालुतां याति पदार्थचिन्तनाद्
धनानि पात्रेषु वपत्यनारतम् ।
किरत्यपुण्यानि सुसाधुसेवना-
दद्यापि तं श्रावकमाहुरञ्जसा ॥ २ ॥

इति निरुक्ताच्च श्रावकत्वं सामान्यस्यापि प्रसिद्धम् ; विवक्षितस्तु निरतिचारसकलव्रतधारी सप्तक्षेत्रीलक्षणे क्षेत्रे धनवपनाद्दर्शनप्रभावकतां परमां दधानो दीनेषु चात्यन्तकृपापरो महाश्रावकशब्देनोच्यत इत्यदोषः ॥ १२० ॥

सप्तक्षेत्र्यां धनवपनं व्यतिरेकद्वारेण समर्थयते—

यः सद्धाद्यमनित्यं च क्षेत्रेषु न धनं वपेत् ।
कथं वराकश्चारित्रं दुश्चरं स समाचरेत् ? ॥ १२१ ॥

---

(१) संप्राप्तदर्शनादिः प्रतिदिवसं यतिजनात् शृणोति च ।
सामाचारीं परमां यः खलु तं श्रावकं ब्रुवते ॥ १ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सदिति विद्यमानमसतो हि धनस्य कथं दानं भवेत् ? सदपि बाह्यं शरीराद्बहिर्भूतं आन्तरस्य तु कस्यचिद्दानं न शक्यं कर्तुं, बाह्यमपि यदि नित्यमाकालस्थायि भवेत् तदा न दीयेताऽपि, इदं त्वनित्यं चौरजलज्वलनदायादपार्थिवादिहरणीयं प्रयत्नगोपितमपि पुण्यक्षयेऽवश्यं विनश्यति ; यदस्मद्गुरवः—

[1]अत्थं चोरा विलुंपंति उद्दालंति य दाइया ।
राया वा संवरावेइ बला मोडीइ कत्थइ ॥ १ ॥
जलणो वा विणासेइ पाणियं वा पलावए ।
अवद्दारेण निग्गच्छे वसणोपहयस्स वा ॥ २ ॥
भूमीसंगोवियं चेव हरन्ति वन्तरा सुरा ।
उज्झित्ता जाइ सव्वं पि मरन्तो वा परं भवं ॥ ३ ॥

अनित्यमपि स्वधनं किञ्चित्क्षेप्तुं शक्यते, न हि बहुतैलमस्तीति पर्वता अभ्यज्यन्त इत्युक्तम् क्षेत्रेष्विति, क्षेत्राणि येषूप्तं धनं शतसहस्रलक्षकोटिगुणं भवति । एवंविधायामपि सामग्र्यां यः स्वधनं न वपेत् स वराकः निःसत्त्वश्चारित्रं महासत्त्वसेवनीयमतएव दुश्चरं कथं समाचरेत् ? ; धनमात्रलुब्धो निःसत्त्वः कथं सर्वसङ्गत्यागरूपं चारित्रं विदधीत ?, अनाराधितचारित्रश्च कथं सद्गतिं

---

(१) अर्थं चौरा विलुम्पन्ति, उद्दालयन्ति च दायादाः ।
राजा वा संवारयति बलात् मृद्यते कुत्रापि ॥ १ ॥
ज्वलनो वा विनाशयति पानीयं वा प्लावयति ।
अपद्वारेण निर्गच्छेत् व्यसनोपहतस्य वा ॥ २ ॥
भूमीसंगोपितमेव हरन्ति व्यन्तराः सुराः ।
उज्झित्वा याति सर्वमपि म्रियमाणो वा परं भवम् ॥ ३ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

प्राप्नुयात् ?, सर्वविरतिप्रतिपत्तिकलशारोपणफलो हि श्रावक-धर्मप्रासाद इति ॥ १२१ ॥

इदानीं महाश्रावकस्य दिनचर्यामाह—

ब्राह्मे मुहूर्त्त उत्तिष्ठेत् परमेष्ठिस्तुतिं पठन् ।
किंधर्मा किंकुलश्चास्मि किंव्रतोऽस्मीति च स्मरन्॥१२२॥

पञ्चदशमुहूर्ता रजनी, तस्यां चतुर्दशे मुहूर्ते ब्राह्मस्तस्मिन्नुत्ति-ष्ठेत् निद्रां जह्यात् ; परमे तिष्ठन्तीति परमेष्ठिनः पञ्चार्हदादय-स्तेषां स्तुतिं नमो अरिहन्ताणमित्यादिरूपामात्यन्तिकतद्बहुमान-कार्य्यभूतां परममङ्गलार्थं वा पठन्नव्यक्तवर्णामिति शेषः ।

यदाह —

[1]परमेट्ठिचिन्तणं माणसम्मि सेज्जागएण कायव्वं ।
सुत्ता विणयपवित्ती निवारिया होइ एवं तु ॥ १ ॥

अन्ये त्वविशेषेणैव नमस्कारपाठमाहुर्न सा काचिदवस्था यस्यां पञ्चनमस्कारस्यानधिकार इति मन्वानाः । न केवलं पठन्, को धर्मो यस्याऽसौ किंधर्मा, किंकुलं यस्याऽसौ किंकुलः, किं व्रतं यस्याऽसौ किंव्रतोऽस्मीत्यहमिति च स्मरन्निदं भावतः स्मरणम् । उपलक्षणत्वात्के गुरवो ममेति द्रव्यतः, कुत्र ग्रामे नगरादौ वा वसामीति क्षेत्रतः, कः कालः प्रभातादिरिति कालतश्चेत्यादि स्मरन्, धर्मस्य जैनादेः, कुलस्येक्ष्वाकादेः, व्रतानामणुव्रतादीनां स्मरणे तद्विरुद्धपरिहारस्येषत्करत्वात् ॥ १२२ ॥

---

(१) परमेष्ठिचिन्तनं मानसे शय्यागतेन कर्तव्यम् ।
सुप्ता विनयप्रवृत्तिर्निवारिता भवति एवं तु ॥ १ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ततः—

शुचिः पुष्पामिषस्तोत्रैर्देवमभ्यर्च्च्य वेश्मनि ।
प्रत्याख्यानं यथाशक्ति कृत्वा देवगृहं व्रजेत् ॥१२४॥

शुचिरिति मलोत्सर्गदन्तधावनजिह्वालेखनमुखप्रक्षालनगण्डूष-करणस्नानादिना शुचिः सन्नित्यनुवादपरं लोकसिद्धो ह्ययमर्थ इति नोपदेशपरम्, अप्राप्ते हि शास्त्रमर्थवत्। न हि मलिनः स्नायात्, बुभुक्षितोऽश्नीयादित्यत्र शास्त्रमुपयुज्यते। अप्राप्ते त्वामुष्मिके मार्गे नैसर्गिकमोहान्धतमसविलुप्तालोकस्य लोकस्य शास्त्रमेव परमं चक्षुरित्येवमुत्तरत्राऽप्यप्राप्ते विषये उपदेशः सफल इति चिन्तनीयम्। न च सावद्यारम्भेषु शास्तॄणां वाच-निक्यऽप्यनुमोदना युक्ता। यदाहुः—

[1]सावज्जणवज्जाणं वयणाणं जो न जाणए विसेसं।
वुत्तं पि तस्स न खमं किमङ्ग! पुण देसणं काउं ॥ १ ॥

इति शुचित्वमनूद्य पुष्पामिषस्तोत्रैरित्याद्युपदिशति—

वेश्मनि गृहे देवं मङ्गलचैत्यरूपं भगवन्तमर्हन्तमभ्यर्च्च्य पूज-यित्वा, पूजाप्रकारानाह—पुष्पामिषस्तोत्रैरिति, पुष्पाणि कुसु-मानि पुष्पग्रहणं सर्वेषां सुगन्धिद्रव्याणां विलेपनधूपगन्धवासवस्त्रा-भरणादीनामुपलक्षणम्। आमिषं भक्ष्यं पेयं च, तच्च पक्वान्नफलाऽ-क्षतदीपजलघृतपूर्णपात्रादिरूपं, स्तोत्रं शक्रस्तवादिसद्भूतगुणोत्की-र्तनरूपं, ततः प्रत्याख्यानं नमस्कारसहिताद्यद्वारूपं सङ्केतरूपं च

(१) सावद्यानवद्यानां वचनानां यो न जानाति विशेषम्।
उक्तमपि तस्य न क्षमं किमङ्ग! पुनर्देशनां कर्तुम्॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ग्रन्थिसहितादि कृत्वा यथाशक्तीति शक्त्यनतिक्रमेण, शक्तितस्त्यागतपसी इति सुप्रसिद्धमेव, देवगृहं भक्तिचैत्यरूपं व्रजेद्गच्छेत् । अत्र च स्नानविलेपनवर्णकविशिष्टवस्त्राभरणालङ्कारशस्त्रपरिग्रहविशिष्टवाहनाधिरोहणप्रभृतीनां स्वतः सिद्धानां नोपदेशः । अप्राप्ते शास्त्रमर्थवदित्युक्तमेव देवगृहव्रजनविधिः पुनरयम्-यदि राजा भवति तदा "सव्वाए इड्ढीए सव्वाए दित्तीए सव्वाए जुईए सव्वबलेणं सव्वपोरिसेणं[1]' इत्यादिवचनात्प्रभावनानिमित्तं महर्द्धया याति ।

अथ सामान्यविभवस्तदा औद्धत्यपरिहारेण लोकोपहासं परिहरन् व्रजति ॥ १२३ ॥

ततः—

प्रविश्य विधिना तत्र त्रिः प्रदक्षिणयेज्जिनम् ।
पुष्पादिभिस्तमभ्यर्च्य स्तवनैरुत्तमैः स्तुयात् ॥ १२४ ॥

तत्र देवगृहे विधिना विधिपूर्वकं प्रविश्य त्रिस्त्रीन् वारान् प्रदक्षिणयेत् प्रदक्षिणीकुर्यात् ; जिनमर्हदृष्टारकम्, प्रवेशविधिश्चायम्-पुष्पताम्बूलादिसचित्तद्रव्याणां च्छुरिकापादुकाद्यचित्तद्रव्याणां च परिहारेण कृतोत्तरासङ्गो जिनबिम्बदर्शनेऽञ्जलिबन्धं शिरस्यारोपयन् मनसश्च तत्परतां कुर्वन्निति पञ्चविधाभिगमेन नैषेधिकीपूर्वं प्रविशति ।

---

(१) सर्वया ऋद्धया, सर्वया दीप्त्या, सर्वया द्युत्या, सर्वबलेन, सर्वपौरुषेण ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

यदाह—[1]सचित्ताणं दव्वाणं वि उसरणयाए, अचित्ताणं दव्वाणं वि उसरणयाए, एगसाडिएणं उत्तरासङ्गकरणेणं चक्खुफासे अञ्जलिपग्गहेणं मणसो एगत्तीभावकरणेणंति।

यस्तु राजादिः चैत्यभवनं प्रविशति स तत्कालं राजचिह्नानि परिहरति।

यदाह—

[2]अवहट्टु रायकउआइं पञ्च वररायकउआरूवाइं।
खग्गं छत्तोवाणह मउडं तह चामराओ य ॥ १ ॥

पुष्पादिभिरिति पुष्पग्रहणं मध्यग्रहणे आद्यन्तयोरपि ग्रहणमिति न्यायप्रदर्शनार्थम्, तथाहि—नित्यं विशेषतश्च पर्वणि स्नात्रपूर्वकं पूजाकरणमिति स्नात्रकाले प्रथमं सुगन्धिश्रीखण्डेन जिनबिम्बस्य तिलककरणम्।

ततः—

मीनकुरङ्गमदागुरुसारं सारसुगन्धिनिशाकरतारम्।
तारमिलन्मलयोत्थविकारं लोकगुरोर्दह धूपमुदारम् ॥ १ ॥

इति वचनाद्धूपोत्क्षेपणम्, ततः सर्वौषध्यादिद्रव्याणां जलपूर्णकलसे क्षेपणं, पश्चात् कुसुमाञ्जलिक्षेपपूर्वकं सर्वौषधिकर्पूरकुङ्कुमश्रीखण्डागुरुप्रभृतिभिर्जलमिश्रैर्घृतदुग्धप्रभृतिमिश्र स्नात्र-

(१) सचित्तानां द्रव्याणामपि अवसरणतया, अचित्तानां द्रव्याणामपि अवसरणतया, एकशाटकेनोत्तरासङ्गकरणेन, चक्षुःस्पर्शे अञ्जलिप्रग्रहेण मनस एकत्वीभावकरणेनेति।

(२) अपहृत्य राजककुदानि पञ्च वरराजककुदरूपाणि।
खड्गः छत्रमुपानद् मुकुटं तथा चामराणि च ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

करणम्, ततः सुरभिणा मलयजरसादिना विलेपनविधानम्, ततः सुगन्धिजाति-चम्पक-शतपत्र-विचकिल-कमलादिमालाभिर्भगवतोऽभ्यर्चनम्, रत्नसुवर्णमुक्ताभरणादिभिरलङ्करणम्, वस्त्रादिभिः परिधापनम्, पुरतश्च सिद्धार्थकशालितण्डुलादिभिरष्टमाङ्गलिकालेखनम्, तत्पुरतश्च बलिमङ्गलदीपदधिघृतादीनां ढौकनम्, भगवतश्च भालस्थले गोरोचनया तिलककरणम्, तत आरात्रिकोद्योतारणम्।

यदाह—

[1]गन्धवरधूवसव्वोसहीहि उअगाइएहिं चित्तेहिं।
सुरहिविलेवणवरकुसुमदामबलिदीवएहिं च ॥ १ ॥
सिद्धत्थयदहिअक्खयगोरोअणमाइएहिं जहलाभं।
कञ्चणमोत्तिअरयणाइदामएहिं च विविहेहिं ॥ २ ॥
पवरेहिं साहणेहिं पायं भावो वि जायए पवरो।
न य अन्नो उवओगो एएसि सिया ण लट्ठयरो ॥ ३ ॥ त्ति।

एवं भगवन्तमभ्यर्च्च पूजयित्वा ऐर्यापथिकीप्रतिक्रमणपूर्वकं शक्रस्तवादिभिर्दण्डकैश्चैत्यवन्दनं कृत्वा स्तवनैः स्तोत्रैरुत्तमैरुत्तम-

---

(१) गन्धवरधूपसर्वौषधीभिरुद्गतादिकैश्चित्रैः।
सुरभिविलेपनवरकुसुमदामबलिदीपकैश्च ॥ १ ॥
सिद्धार्थक-दध्यक्षत-गोरोचनादिकैर्यथालाभम्।
काञ्चनमौक्तिकरत्नादिदामभिश्च विविधैः ॥ २ ॥
प्रवरैः साधनैः प्रायो भावोऽपि जायते प्रवरः।
न चान्य उपयोग एतेषां स्याद् मनोहरतरः ॥ ३ ॥ इति।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कविरचितैः स्तूयाद् गुणोत्कीर्तनं कुर्यात् । स्तोत्राणां चोत्तमत्व-मिदमुक्तम्—

यथा—

पिण्डक्रियागुणगतैर्गम्भीरैर्विविधवर्णसंयुक्तैः ।
आशयविशुद्धिजनकैः संवेगपरायणैः पुण्यैः ॥ १ ॥
पापनिवेदनगर्भैः प्रणिधानपुरस्सरैर्विचित्रार्थैः ।
अस्खलितादिगुणयुतैः स्तोत्रैश्च महामतिग्रथितैः ॥२॥ इति ।

न पुनरेवंविधैः—

एकं ध्याननिमीलनान्मुकुलितं चक्षुर्द्वितीयं पुनः
पार्वत्या विपुले नितम्बफलके शृङ्गारभारालसम् ।
अन्यद्दूरविकृष्टचापमदनक्रोधानलोद्दीपितं
शम्भोर्भिन्नरसं समाधिसमये नेत्रत्रयं पातु वः ॥ १ ॥

तथा—

धन्या केयं स्थिता ते शिरसि शशिकला किं नु नामैतदस्या
नामैवास्यास्तदेतत्परिचितमपि ते विस्मृतं कस्य हेतोः ।
नारीं पृच्छामि नेन्दुं कथयतु विजया न प्रमाणं यदीन्दु-
र्देव्या निह्नोतुमिच्छोरिति सुरसरितं शाठ्यमव्याद्विभोर्वः ॥ १ ॥

तथा—

[1]पनमत पनयप्पकुपितगोलीचलणग्गलग्गपडिबिंबं ।
तसमु नखतप्पनेसुं एकातसतनुथलं लुद्दं ॥ १ ॥

---

(१) प्रणमत प्रणयप्रकुपितगौरीचरणाग्रलग्नप्रतिबिम्बम् ।
दृशमु नखदर्पणेषु एकादशतनुधरं रुद्रम् ॥ १ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तथा—

एतत्किं शिरसि स्थितं मम पितुः खण्डं सुधादीधिते-
र्लीलाटं किमिदं विलोचनमिदं हस्तेऽस्य किं पन्नगः।
इत्थं क्रौञ्चरिपोः क्रमादुपगते दिग्वाससः शूलिनः
प्रश्ने वामकरोपरोधसुभगं देव्याः स्मितं पातु वः॥ १॥

तथा—

उत्तिष्ठन्त्या रतान्ते भरसुरगपतौ पाणिनैकेन कृत्वा
धृत्वा चान्येन वासो विगलितकबरीभारमंसं वहन्त्याः।
भूयस्तत्कालकान्तिद्विगुणितसुरतप्रीतिना शौरिणा वः
शय्यामालिङ्ग्य नीतं वपुरलसलसद्बाहु लक्ष्म्याः पुनातु॥ १॥

[1]अनेन च सम्पूर्णो वन्दनाविधिरुपलक्षितः।

यथा—

[2]तिन्नि निसीहिय तिन्नि य पयाहिणा तिन्नि चेव य पणामा।
तिविहा पूआ य तहा अवत्थतियभावणं चेव॥ १॥
तिदिसिनिरक्खणविरई भूमीइ पमज्जणं च तिक्खुत्तो।
वण्णाइतियं मुद्दातियं च तिविहं च पणिहाणं॥ २॥
पुप्फामिसथुइभेआ तिविहा पूआ अवत्थतियगं तु।

---

(१) च एतेन।

(२) तिस्रो नैषेधिक्यस्तिस्रश्च प्रदक्षिणास्त्रय एव च प्रणामाः।
त्रिविधा पूजा च तथाऽवस्थात्रिकभावनं चैव॥ १॥
त्रिदिग्निरीक्षणविरतिर्भूमौ प्रमार्जनं च त्रिकृत्वः।
वर्णादित्रिकं मुद्रात्रिकं च त्रिविधं च प्रणिधानम्॥ २॥
पुष्पामिषस्तुतिभेदात्त्रिविधा पूजाऽवस्थात्रिकं तु।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

[1]छउमत्थ-केवलित्तं सिद्धत्तं भुवणनाहस्स ॥ ३ ॥
वण्णाइतियं तु पुणो वण्णत्थालम्बणस्सरूवं तु ।
मणवयणकायजणिअं तिविहं पणिहाणमवि होइ ॥ ४ ॥

तथा —

[2]पंचंगो पणिवाओ थयपाढो होइ जोगमुद्दाए ।
वन्दन जिणमुद्दाए पणिहाणं मुत्तसुत्तीए ॥ १ ॥
दो जाणू दोन्नि करा पंचमयं होइ उत्तिमंगं तु ।
सम्मं संपणिवाओ नेओ पंचंगपणिवाओ ॥ २ ॥
अस्सोसंतरिअंगुलिकोसागारेहिं दोहिं हत्थेहिं ।
पिट्ठोवरिकोप्परसंठिएहिं तह जोगमुद्दत्ति ॥ ३ ॥
चत्तारि अंगुलाइं पुरओ जाणाइं जत्थ पच्छिमओ ॥
पायाणं उस्सग्गो एसा [3]पुण होइ जिणमुद्दा ॥ ४ ॥

---

(१) छद्मस्थ-केवलित्वं सिद्धत्वं भुवननाथस्य ॥ ३ ॥
वर्णादित्रिकं तु पुनर्वर्णार्थालम्बनस्वरूपं तु ।
मनो-वचन कायजनितं त्रिविधं प्रणिधानमपि भवति ॥ ४ ॥

(२) पञ्चाङ्गः प्रणिपातः स्तवपाठो भवति योगमुद्रया ।
वन्दनं जिनमुद्रया प्रणिधानं मुक्ताशुक्त्या ॥ १ ॥
द्वे जानुनी द्वौ करौ पञ्चमकं भवत्युत्तमाङ्गं तु ।
सम्यक् संप्रणिपातो ज्ञेयः पञ्चाङ्गप्रणिपातः ॥ २ ॥
अन्योन्यान्तरिताङ्गुलिकोशागाराभ्यां द्वाभ्यां हस्ताभ्याम् ।
उदरोपरिकूर्परसंस्थिताभ्यां तथा योगमुद्रेति ॥ ३ ॥
चत्वार्यङ्गुलानि पुरत ऊनानि यत्र पश्चिमकः ।
पादयोरुत्सर्ग एषा पुनर्भवति जिनमुद्रा ॥ ४ ॥

(३) ख ग ङ खलु ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

[1]सुत्तासुत्तीसुद्दा [2]जत्थ समा दोवि गब्भिया हत्था।
ते पुण णिडालदेसे लग्गा अन्ने अलग्गत्ति ॥ ५ ॥ इत्यादि।

ऐर्यापथिकीप्रतिक्रमणपूर्वकं चैत्यवन्दनमित्युक्तम्। तत ऐर्यापथिकीसूत्रं व्याख्यायते-तत्र इच्छामि पडिक्कमिउमित्यादि तस्स मिच्छामि दुक्कडमित्यन्तम्, इच्छामि पडिक्कमिउं इरियावहियाए विराहणाए; इच्छामि अभिलषामि प्रतिक्रमितुं प्रतीपं क्रमितुम्, ईरणमीर्या गमनमित्यर्थः, तत्प्रधानः पन्था ईर्यापथः, तत्र भवा ऐर्यापथिकी; काऽसौ? विराधना जन्तुबाधा, तस्या ऐर्यापथिक्या विराधनायाः सकाशात् प्रतिक्रमितुमिच्छामीति सम्बन्धः। अस्मिंश्च व्याख्याने ईर्यापथनिमित्ताया एव विराधनायाः प्रतिक्रमणं स्याद् न तु शयनादेरुत्थितस्य कृतलोचादेर्वा; तस्मादन्यथा व्याख्यायते—ईर्यापथः साध्वाचारः, यदाह- ईर्यापथो मौनध्यानादिकं भिक्षुव्रतं तत्र भवा ऐर्यापथिकी; काऽसौ? विराधना साध्वाचारातिक्रमरूपा तस्या इच्छामि प्रतिक्रमितुमिति सम्बन्धः। साध्वाचाराऽतिक्रमश्च प्राणातिपातादिरूपः। तत्र च प्राणातिपातस्यैव गरीयस्त्वम्, शेषाणां तु पापस्थानानामत्रैवान्तर्भावः, अत एव प्राणातिपातविराधनाया एवोत्तरः प्रपञ्चः। क्व सति विराधना? गमणागमणे गमनं चागमनं च समाहारद्वन्द्वस्तस्मिन्,

---

(१) सुक्तायुक्तिसुद्रा यत्र समौ द्वावपि गर्भितौ हस्तौ।
तौ पुनर्ललाटदेशे लग्नावन्योन्यलग्नाविति ॥ ५ ॥

(२) क ग ङ समा जहिं।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

गमनं प्रयोजने सति बहिर्यानम्, आगमनं प्रयोजनसमाप्तौ स्वस्थान एव गमनम्। गमनागमनेऽपि कथं विराधना ? इत्याह —पाणक्कमणे प्राण्याक्रमणे प्राणिनो द्वीन्द्रियादयस्तेषामाक्रमणं पादेन पीडनं प्राण्याक्रमणं तत्र ; तथा, बीअक्कमणे बीजाक्रमणे, अनेन बीजानां जीवत्वमाह ; तथा, हरिअक्कमणे हरिताक्रमणे ; अनेन सकलवनस्पतेः, तथा, ओसाउत्तिंगपणगदगमट्टीमक्कडासंताणासंकमणे, अवश्यायो जलविशेषः, इह चावश्यायग्रहणमतिशयतः शेषजलसम्भोगपरिहरणार्थम्, उत्तिंगा गर्दभाकृतयो जीवाः, ते हि भूमौ विवराणि कुर्वन्ति, कीटिकानगराणि वा उत्तिंगाः ; पनकः पञ्चवर्णोल्लिः ; दकमृत्तिका अनुपहतभूमौ चिक्खिल्लः ; अथवा, दकशब्देनाप्कायो गृह्यते मृत्तिकाशब्देन तु पृथ्वीकाय इति ; मर्कटः कोलिकस्तस्य सन्तानो जालकम्, ततश्चावश्यायोत्तिङ्गश्चेत्यादिद्वन्द्वः. तेषां संक्रमणमाक्रमणं तस्मिन्। कियन्तोवा भेदेनाख्यातुं शक्यन्ते ? इत्याह-जे मे जीवा विराहिया ये केचन सर्वथा मया जीवा विराधिता दुःखे स्थापिताः ; ते च एगिंदिया एकं स्पर्शनमात्रमिन्द्रियं येषां ते एकेन्द्रियाः पृथिव्यप्तेजोवायुवनस्पतिलक्षणाः ; बेइंदिया द्वे स्पर्शनरसने इन्द्रिये येषां ते द्वीन्द्रियाः कृम्यादयः ; तेइंदिया त्रीणि स्पर्शनरसनघ्राणानि इन्द्रियाणि येषां ते त्रीन्द्रियाः पिपीलिकादयः ; चउरिंदिया चत्वारि स्पर्शनरसनघ्राणचक्षुर्लक्षणानीन्द्रियाणि येषां ते चतुरिन्द्रिया भ्रमरादयः ; पंचिंदिया पञ्च श्रोत्रान्तानि इन्द्रियाणि येषां ते पञ्चेन्द्रिया मूषकादयः। विराधनाप्रकारमाह अभिहया अभिमुखा हताचरणेन घट्टिताः, उत्क्षिप्य क्षिप्ता

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

वा ; वत्तिआ वर्तिताः पुञ्जीकृताः धूलिचिक्खल्लादिना स्थगिताः ; लेसिआ श्लेषिताः पिष्टा भूम्यादिषु वा लगिताः ; संघाइया संघातिताः अन्योन्यगात्रैरेकत्र लगिताः ; संघट्टिया संघट्टिताः मनाक् स्पृष्टाः ; परिआविआ परितापिताः समन्ततः पीडिताः ; किलामिआ क्लमिता ग्लानिमापादिता मारणान्तिकं समुद्घातं नीता इत्यर्थः ; उद्दविआ अवद्राविता उत्त्रासिताः ; ठाणाउ ट्ठाणं संकामिया स्वस्थानात् परस्थानं नीताः ; जीवियाओ ववरोविया जीविताद् व्यपरोपिता मारिता इत्यर्थः ; तस्स तस्स अभिहया इत्यारभ्योक्तविराधनाप्रकारस्य सर्वस्य मिच्छामि दुक्कडं मिथ्या मे दुष्कृतम् एतद् दुष्कृतं मिथ्या मे भवतु विफलं भवत्वित्यर्थः। मिच्छामि दुक्कडमित्यस्य पूर्वाचार्या निरुक्तविधिमुपदर्शयन्ति—

तद्यथा —

[1]'मित्ति मिउमद्दवत्थे क्कत्ति य दोसाण छायणे होइ।
मित्ति अमेराए ठिओ दुत्ति दुगंछामि अप्पाणं ॥ १ ॥
क्कत्ति कडं मे पावं डत्ति य डेवेमि तं उवसमेणं।
एसो मिच्छादुक्कडपयक्खरत्थो समासेणं ॥ २ ॥

एवमालोचनाप्रतिक्रमणरूपं द्विविधं प्रायश्चित्तं प्रतिपद्य कायोत्सर्गलक्षणं प्रायश्चित्तं प्रतिपित्सुरिदं सूत्रं पठति—तस्स उत्तरीकरणेणं

---

(१) मीति मृदु-मार्दवार्थे क्केति च दोषाणां छादने भवति।
मीत्यमर्यादायां स्थितो दु-इति जुगुप्से आत्मानम् ॥ १ ॥
क्केति कृतं मे पापं डेति च लक्षयामि तदुपशमेन।
एष मिच्छादुक्कड (मिथ्यादुष्कृत) पदाक्षरार्थः समासेन ॥ २ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पायच्छित्तकरणेणं विसोहीकरणेणं विसल्लीकरणेणं पावाणं कम्माणं निग्घायणट्ठाए ठामि काउस्सग्गं। तस्यालोचितप्रतिक्रान्तस्य विराधनाप्रकारस्य उत्तरीकरणादिना हेतुभूतेन ठामि काउस्सग्गमिति योगः। तत्रोत्तरकरणं पुनः संस्कारद्वारेण परिष्करणमनुत्तरस्योत्तरस्य करणमुत्तरीकरणम्; अयं भावः—विराधनस्य हि पूर्वमालोचनादिकं कृतं तस्यैव कायोत्सर्गकरणमुत्तरकरणम्, तेन पापकर्मनिर्घातना भवति। उत्तरीकरणं च प्रायश्चित्तकरणद्वारेण भवति इत्याह-पायच्छित्तकरणेणं प्रायो बाहुल्येन चित्तं जीवं मनो वा शोधयति प्रायश्चित्तम्; यद्वा, पापं छिनत्तीति पापच्छित् आर्षत्वात्पायच्छित्तं तस्य करणेन हेतुभूतेन। प्रायश्चित्तकरणं च विशुद्धिद्वारेण भवतीत्याह—विसोहीकरणेणं विशोधनं विशुद्धिः अपराधमलिनस्यात्मनो निर्मलीकरणं विशुद्धेः करणं विशुद्धिकरणं तेन हेतुभूतेन। विशुद्धिकरणं च विशल्यकरणद्वारेण भवति अत आह—विसल्लीकरणेणं विगतानि शल्यानि मायादीनि यस्याऽसौ विशल्यः, अविशल्यस्य विशल्यस्य करणं तेन हेतुभूतेन। किमित्याह-पावाणं कम्माणं निग्घायणट्ठाए पापानां संसारनिबन्धनभूतानां कर्मणां ज्ञानावरणीयादीनां निर्घातनार्थाय निर्घातनमुच्छेदः स एवार्थः प्रयोजनं तस्मै, ठामि काउस्सग्गं अनेकार्थत्वाद्धातूनां ठामि करोमि कायस्य उत्सर्गो व्यापारवतः परित्यागस्तम्। किं सर्वथा? नेत्याह-अन्नत्थ ऊससिएणं अन्यत्रोच्छ्वसितात्, तृतीया पञ्चम्यर्थे, ऊर्ध्वं प्रलम्बं वा श्वसितमुच्छ्वसितं तन्मुक्त्वा योऽन्यो व्यापारस्तेन व्यापारवतः

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कायस्य उत्सर्ग इत्यर्थः, उच्छ्वसितं हि निरोद्धुमशक्यम्, तन्निरोधे सद्यः प्राणविघाताद्यापत्तेः ।

यदाह—

[1]ऊसासं न निरुंभइ आभिग्गहिओवि किमुअ चिट्ठाए ।
सज्ज मरणं निरोहे सुहुमुस्सासं तु जयणाउ ॥ १ ॥

एवं निःश्वसितादपि नौससिएणं अधःश्वसितं निःश्वसितं तस्मात्; खासिएणं काशितात्; छिएणं क्षुतात्; जम्भाइएणं विजृत-वदनस्य प्रबलपवननिर्गमो जृम्भितं तस्मात्; उड्डुएणं उद्गारितात्; वायनिसग्गेणं अपानेन पवननिर्गमो वातनिसर्गस्तस्मात्; भमलिए शरीरभ्रमेराकस्मिक्याः; पित्तमुच्छाए पित्तप्राबल्यान्मनाग्मोहो मूर्छा तस्याः; सुहुमेहिं अंगसंचालेहिं सूक्ष्मेभ्यो लक्ष्यालक्ष्येभ्यो-ऽङ्गसञ्चारेभ्यो गात्रविचलनप्रकारेभ्यो रोमोद्गमादिभ्यः; सुहुमेहिं खेलसंचालेहिं सूक्ष्मेभ्यः खेलस्य श्लेष्मणः सञ्चारेभ्यः; आत्मनो हि वीर्ययुक्तद्रव्यतया अन्तःसूक्ष्मश्लेष्मसञ्चारः सम्भवतीत्यतोऽन्यत्रोच्यते सुहुमेहिं दिट्ठिसंचालेहिं सूक्ष्मेभ्यो दृष्टिसञ्चारेभ्यो निमेषादिभ्यः; सूक्ष्मा हि दृष्टिसञ्चारास्तदा सर्वथा निरोद्धुं शक्यन्ते यदा एकस्मिन् द्रव्ये दृष्टिनिवेशः स्थिरीकर्तुं शक्यते, न च शक्यते कर्तुमिति । उच्छ्वसितादिभ्योऽन्यत्र कायोत्सर्गं करोमीत्येतावता किमुक्तं भवति एवमाइएहिं आगारेहिं अभग्गो अविराहिओ हुज्ज मे काउस्सग्गो एवमादिभिरुच्छ्वसितनिःश्वसितादिभिः पूर्वोक्तैराकारैरपवादरूपै-

---

(१) उच्छ्वासं न निरुणद्धि आभिग्रहिकोऽपि किमुत चेष्टया ।
सद्यो मरणं निरोधे सूक्ष्मोच्छ्वासं तु यतनया ॥ १ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

रभग्नोऽविराधितो मे कायोत्सर्गो भूयादिति सम्बन्धः ; आदिशब्दादन्यैरपि यदा अग्नेर्विद्युतो वा ज्योतिः स्पृशति तदा प्रावरणायोपधिग्रहणं कुर्वतो न कायोत्सर्गभङ्गः । ननु नमस्कारमेवाभिधाय किमिति तदृग्रहणं न करोति येन तद्भङ्गो न भवति ? । उच्यते—नाऽत्र नमस्कारेण पारणमेवावशिष्टकायोत्सर्गमानं क्रियते, किन्तु यो यत्परिमाणः कायोत्सर्ग उक्तस्तावन्तं कालं प्रतीक्ष्य तत ऊर्ध्वं नमस्कारमपठित्वा पारयतो भङ्गोऽपरिसमाप्तेऽपि च पठतो भङ्ग एव, तस्माद्यो यत्परिमाणः कायोत्सर्गस्तस्मिन् पूर्ण एव नमो अरिहंताणमिति वक्तव्यम् । तथा मार्जारमूषिकादेः पुरतो गमनेऽग्रतः सरतोऽपि न भङ्गः । तथा चौरसंभ्रमे राजसंभ्रमे वा अस्थानेऽपि नमस्कारमुच्चारयतो न भङ्गः । तथा सर्पदष्टे आत्मनि परे वा साध्वादौ सहसा उच्चारयतो न भङ्गः ।

यदाहुः—

[1]अगणि-उच्छिन्दिज्ज-बोहिअखोभाइ-दीहडक्को वा ।
आगारेहिं न भग्गो उस्सग्गो एवमाईहिं ॥ १ ॥

आक्रियन्ते आगृह्यन्ते इत्याकाराः कायोत्सर्गापवादप्रकारा इत्यर्थः, तैराकारैर्विद्यमानैरपि भग्नः सर्वथा विनाशितः, न भग्नोऽभग्नः, विराधितो देशभग्नः, न विराधितोऽविराधितो भवेन्मम कायोत्सर्गः । कियन्तं कालं यावदित्याह—जाव अरिहंताणं भगवंताणं नमोक्कारेणं न पारेमि यावदिति कालावधारणे, याव-

(१) अग्न्युच्छेद्य-बोधिकक्षोभादि दीर्घदष्टो वा ।
आकारैर्न भग्न उत्सर्ग एवमादिभिः ॥ १ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

दर्हतां भगवतां सम्बन्धिना नमस्कारेण नमोऽरिहंताणमित्यनेन न पारयामि न पारं गच्छामि तावत्किमित्याह ताव कायं ठाणेणं मोणेणं झाणेणं अप्पाणं वोसिरामि तावत्तावन्तं कालं कायं देहं स्थानेनोर्द्धस्थानेन हेतुभूतेन ऊर्द्धस्थानमभिगृह्य कायप्रसरनिषेधेनेत्यर्थः, मौनेन वाग्निरोधलक्षणेन, ध्यानेन शुभेन सद्विषये चित्तमभिगृह्येत्यर्थः; अप्पाणं आर्षत्वादात्मीयं कायं वोसिरामि व्युत्सृजामि कुव्यापारनिराकरणेन परित्यजामि। अन्ये तु अप्पाणमिति न पठन्ति। अयमर्थः—पञ्चविंशत्युच्छ्वासमानं कालं यावदूर्द्धस्थानस्थितः प्रलम्बभुजो निरुद्धवाक्प्रसरः प्रशस्तध्यानाऽनुगतस्तिष्ठामि स्थानमौनध्यानक्रियाव्यतिरेकेण क्रियान्तराध्यासद्वारेण व्युत्सृजामि। पञ्चविंशत्युच्छ्वासाश्च चतुर्विंशतिस्तवेन चन्देसु निम्मलयरा इत्यन्तेन चित्तितेन पूर्यन्ते, पायसमा ऊसासा इति वचनात्। संपूर्णकायोत्सर्गश्च नमो अरहंताणमिति नमस्कारपूर्वकं पारयित्वा चतुर्विंशतिस्तवं सम्पूर्णं पठति। एवं सन्निहिते गुरौ तत्समक्षं, गुरुविरहे तु गुरुस्थापनां मनसिकृत्वा ईर्यापथप्रतिक्रमणं निर्वर्त्य चैत्यवन्दनमुत्कृष्टमारभ्यते, जघन्यमध्यमे तु चैत्यवन्दने ऐर्यापथिकीप्रतिक्रमणमन्तरेणाऽपि भवतः। अत्र नमस्कारेण नमो अरहंताणमित्यनेन

वपुरेव तवाचष्टे भगवन्! वीतरागताम्।
न हि कोटरसंस्थेऽग्नौ तरुर्भवति शाद्वलः॥ १॥

इत्यादिना कविकृतेन च जघन्या चैत्यवन्दना भवति। अन्ये तु प्रणाममात्ररूपां जघन्यां चैत्यवन्दनां वदन्ति।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

प्रणामस्तु पञ्चधा--

एकाङ्गः शिरसो नामे स द्व्यङ्गः करयोर्द्वयोः ।
त्रयाणां नमने त्र्यङ्गः करयोः शिरसस्तथा ॥ १ ॥
चतुर्णां करयोर्जान्वोर्नमने चतुरङ्गकः ।
शिरसः करयोर्जान्वोः पञ्चाङ्गः पञ्चके नते ॥ २ ॥

मध्यमा तु स्थापनार्हस्तवदण्डकेन स्तुत्या चैकया भवति । यदाह—

[1]नवकारेण जहन्ना दंडगथुइजुगल मज्झिमा णेया ।
संपुण्णा उक्कोसा विहिणा खलु वंदणा तिविहा ॥ १ ॥

इत्युत्कृष्टया चैत्यवन्दनया वन्दितुकामो विरतः साधुः श्रावकश्च अविरतसम्यग्दृष्टिरपुनर्बन्धको वा यथाभद्रको यथोचितं प्रतिलेखितप्रमार्जितस्थण्डिलो भुवनगुरौ विनिवेशितनयनमानसः संवेगवैराग्यवशादुत्पन्नरोमाञ्चकञ्चुको मुदश्रुपूर्णलोचनः अतिदुर्लभं भगवत्पादवन्दनमिति बहु मन्यमानो योगमुद्रया अस्खलितादिगुणोपेतं तदर्थानुस्मरणगर्भं प्रणिपातदण्डकसूत्रं पठति । तत्र च त्रयस्त्रिंशदालापका आलापकद्विकादिप्रमाणाश्च विश्रामभूमिरूपा नवसम्पदो भवन्ति । यदाह--

[2]दो तिअ चउर ति पंचा दोन्नि अ चउरो य हुन्ति तिन्नेय ।
सक्कथए नव संपय तित्तीसं होन्ति आलावा ॥ १ ॥

---

(१) नमस्कारेण जघन्या दण्डकस्तुतियुगलाद् मध्यमा ज्ञेया ।
सम्पूर्णोत्कृष्टा विधिना खलु वन्दना त्रिविधा ॥ १ ॥

(२) द्वौ त्रयश्चत्वारस्त्रयः पञ्च द्वौ च चत्वारश्च भवन्ति त्रयश्च ।
शक्रस्तवे नव सम्पदास्त्रयस्त्रिंशद् भवन्ति आलापाः ॥ १ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

एतांश्च यथाख्यानं नामतः प्रमाणतश्च कथयिष्यन्ते । व्याख्या नमोत्थुणं अरहंताणं भगवंताणं तत्र नम इति नैपातिकं पदं पूजार्थं, पूजा च द्रव्यभावसङ्कोचः । तत्र करशिरःपादादिद्रव्यसन्न्यासो द्रव्यसङ्कोचः, भावसङ्कोचस्तु विशुद्धस्य मनसो नियोगः, अस्त्विति भवतु । प्रार्थनैषा धर्मबीजमाशयविशुद्धिजनकत्वात् । णमिति वाक्यालङ्कारे । अतिशयपूजामर्हन्तीति अर्हन्तः ।

यदाह—

[1]अरहंति वंदणनमंसणाइं अरहंति पूयसक्कारं ।
सिद्धिगमणं च अरिहा अरहंता तेण वुच्चंति ॥ १ ॥

सुगृहिषार्हः सत्रिशत्रुस्तुत्ये ॥५।२।२६॥ इति वर्त्तमानकालेऽत्रश् । कथं वर्तमानकालत्वमिति चेत्, पूजारम्भस्याऽनुपरमात् । एष एव हि न्याय्यो वर्तमानकालो यत्रारब्धस्यापवर्गो नास्ति । तथा अरिहननादर्हन्तः, अरयश्च मोहादयः साम्परायिककर्मबन्धहेतवः, तेषामरीणामनेकभवगहनव्यसनप्रापणकारणानां हननादर्हन्तः । तथा रजोहननादर्हन्तः, रजश्च घातिकर्मचतुष्टयं येनावृतस्यात्मनः सत्यपि ज्ञानादिगुणस्वभावत्वे घनसमूहस्थगितगभस्तिमण्डलस्य विवस्वत इव तद्गुणानामभिव्यक्तिर्न भवति तस्य हननादर्हन्तः । तथा रहस्याभावादर्हन्तः ; तथाहि—भगवतां निरस्तनिरवशेषज्ञानावरणादिकर्मपारतन्त्र्याणां केवलमप्रतिहतमनन्तमद्भुतं ज्ञानं दर्शनं चास्ति, ताभ्यां जगदनवरतं युगपत्प्रत्यक्षतो जानतां पश्यतां च

---

(१) अर्हन्ति वन्दन-नमस्यनाद्यर्हन्ति पूजासत्कारम् ।
सिद्धिगमने च अर्हा अर्हन्तस्तेनोच्यन्ते ॥ १ ॥

S118

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

रहस्यं नास्ति, तस्माद्रहस्याभावादर्हन्तः। एषु त्रिष्वर्थेषु पृषोदरादित्वादर्हदिति सिद्ध्यति। अथवा अविद्यमानं रह एकान्तरूपो देशोऽन्तश्च मध्यं गिरिगुहादीनां सर्ववेदितया प्रच्छन्नस्य कस्याप्यभावेन येषां तेऽरहोऽन्तरस्तेभ्योऽरहोन्तर्भ्यः। अथवा अरहद्भ्यः क्षीणरागत्वात् क्वचिदप्यासक्तिमगच्छद्भ्यः। अथवा अरहद्भ्यो रागद्वेषहेतुभूतमनोज्ञेतरविषयसंपर्केऽपि वीतरागत्वादिकं स्वं स्वभावमत्यजद्भ्यः। अरिहंताणमिति पाठान्तरं वा; तत्र कर्मारिहन्तृभ्यः।

आह च--

[1]अट्ठविहं पि हु कम्मं अरिभूयं होइ सयलजीवाणं।
तं कम्ममरिहंता अरिहंता तेण वुच्चंति ॥ १ ॥

अरुहंताणमित्यपि पाठान्तरम्। तत्र अरोहद्भ्योऽनुपजायमानेभ्यः, क्षीणकर्मबीजत्वात्।

उक्तञ्च —

दग्धे बीजे यथात्यन्तं प्रादुर्भवति नाङ्कुरः।
कर्मबीजे तथा दग्धे नारोहति भवाङ्कुरः ॥ १ ॥

शाब्दिकास्तु अर्हच्छब्दस्यैव प्राकृते रूपत्रयमिच्छन्ति; यदयमवोचाम--"उच्चार्हति" ॥८।२ १११॥ चकाराददितावपि, तेभ्योऽर्हद्भ्यो नमोऽस्त्विति नमःशब्दयोगाच्चतुर्थी, "चतुर्थ्याः षष्ठी" ॥८।३।१३१॥ इति प्राकृतसूत्राच्चतुर्थ्याः स्थाने षष्ठी। बहुवचनं चा-

---

(१) अष्टविधमपि खलु कर्माऽरिभूतं भवति सकलजीवानाम्।
तत् कर्मारिहन्तारोऽर्हन्तस्तेनोच्यन्ते ॥ १ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

इतरव्यवच्छेदेनाऽर्हद्बहुत्वख्यापनार्थम्, विषयबहुत्वेन नमस्कर्तुः फलातिशयज्ञापनार्थं च। एते चाऽर्हन्तो नामाद्यनेकभेदा इति भावार्हत्वसम्परिग्रहार्थमाह भगवज्ञः—

भगोऽर्कज्ञानमाहात्म्ययशोवैराग्यमुक्तिषु।
रूपवीर्यप्रयत्नेच्छाश्रीधर्मैश्वर्ययोनिषु ॥ १ ॥

इति वचनादर्कयोनिवर्जमिह द्वादशधा भगशब्दस्यार्थः स विद्यते येषां ते भगवन्तः, निन्दावर्जं भूम्यादिष्वर्थेषु मतुः; ज्ञानं तावद्गर्भनिवासात् प्रभृति आदीक्षातो मतिश्रुतावधिलक्षणं दीक्षानन्तरं क्षपकश्रेण्यारोहणात् क्षीणघातिकर्मचतुष्टयक्षयाद् मनःपर्यायज्ञानसहितम्, घातिक्षये चानन्तमनन्तविषयं निःशेषभावाभावस्वभावावभासकं केवलज्ञानम्। १। माहात्म्यं प्रभावातिशयः, तच्च सर्वकल्याणकेषु नारकाणामपि सुखोत्पादकत्वेन नित्यसन्तमसेष्वपि नरकेषु प्रकाशजनकत्वेन गर्भनिवासात् प्रभृति कुलस्य धनादिवर्धनेनाऽप्रणतसामन्तानां च प्रणत्येतिमारिवैरोपद्रुतिवर्जितराज्यकरणेनाऽतिवृष्ट्यनावृष्टिप्रभृत्युपद्रवरहितजनपदत्वेन चलितासनसकलसुरासुरप्रणतपादपद्मत्वेन चाऽवसेयम्। २। यशस्तु रागद्वेषपरीषहोपसर्गपराक्रमसमुत्थमाकालप्रतिष्ठं यत्सर्वदा दिवि सुरसुन्दरीभिः पाताले नागकन्याभिर्गीयते सुरासुरैर्नित्यमभिष्टूयते च ।३। वैराग्यं मरुन्नरेन्द्रलक्ष्मीमनुभवतामपि यत्र तत्र रतिर्नाम, यदा तु सर्वविषयत्यागपूर्वकं प्रव्रज्यां प्रतिपद्यन्ते तदाऽलमेभिरिति, यदा तु क्षीणकर्मणो भवन्ति तदा सुखदुःखयोर्भवमोक्षयोरीदासीन्यमिति त्रिविधमप्यतिशायि भवति।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

यदवोचाम वीतरागस्तोत्रे—

यदा मरुन्नरेन्द्रश्रीस्त्वया नाथोपभुज्यते ।
यत्र तत्र रतिर्नाम विरक्तत्वं तदापि ते ॥ १ ॥
नित्यं विरक्तः कामेभ्यो यदा योगं प्रपद्यसे ।
अलमेभिरिति प्राज्यं तदा वैराग्यमस्ति ते ॥ २ ॥
सुखे दुःखे भवे मोक्षे यदौदासीन्यमीशिषे ।
तदा वैराग्यमेवेति कुत्र नाऽसि विरागवान् ॥३॥ इति ।४।

मुक्तिश्च सकलक्लेशप्रहाणलक्षणा सन्निहितैवेति । ५ ।

रूपं तु—

[1]सव्वसुरा जइ रूवं अंगुट्ठपमाणयं विउव्विज्जा ।
जिणपायंगुट्ठं पइ न सोहए तं जहिंगालो ॥ १ ॥

इति निदर्शनात् सिद्धं सर्वातिशायि । ६ । वीर्यं च मेरोर्दण्ड-रूपतां धरित्र्याश्च छत्ररूपतां कर्तुं सामर्थ्यम् श्रूयते ; हि तत्काल-जातेनैव श्रीमहावीरेण शक्रशङ्कापनोदाय वामपादाङ्गुष्ठेन मेरु-पर्वतः प्रकम्पितः । ७ । प्रयत्नः परमवीर्यसमुत्थ एकरात्रिक्यादि-महाप्रतिमाभावहेतुः समुद्घातशैलेश्यवस्थाव्यङ्ग्यः । ८ । इच्छा तु जन्मान्तरे सुरजन्मनि तीर्थंकरजन्मनि च दुःखपङ्कमग्नस्य जगत उद्धिधीर्षातिशयवती । ९ । श्रीघातिकर्मोच्छेदविक्रमावाप्तकेवला-लोकसम्पत्तिः, अतिशयसुखसम्पच्चानुपमा । १० । धर्मः पुन-रनाश्रवो महायोगात्मको निर्जराफलोऽतिश्रेयान् । ११ । ऐश्वर्यं तु

---

(1) सर्वसुरा यदि रूपमङ्गुष्ठप्रमाणकं विकुर्वेयुः ।
जिनपादाङ्गुष्ठं प्रति न शोभते तद् यथाङ्गारः ॥ १ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

भक्तिभरावनम्रत्रिदशपतिविहितसमवसरणप्रातिहार्यादिरूपम् ।१२।
एवम्भूता एव प्रेक्षावतां स्तोतव्या इत्याभ्यामालापकाभ्यां स्तोतव्यसम्पदुक्ता । साम्प्रतमस्या हेतुसम्पदुच्यते—आइगराणं तित्थयराणं सयंसंबुद्धाणं—आदिकरणशीला आदिकरणहेतवो वा आदिकराः सकलनीतिनिबन्धनस्य श्रुतधर्मस्येति सामर्थ्याद्गम्यते तेभ्यः । यद्यपि सैषा द्वादशाङ्गी न कदाचिन्नासीत्, न कदाचिन्न भवति, न कदाचिन्न भविष्यति, अभूच्च भवति च भविष्यति चेति वचनाद् नित्या द्वादशाङ्गी ; तथाप्यर्थापेक्षया नित्यत्वं शब्दापेक्षया तु स्वस्ततीर्थेषु श्रुतधर्मादिकरत्वमविरुद्धम् । एतेऽपि कैवल्यानन्तरापवर्गवादिभिरतीर्थकरा एवेष्यन्ते अकृत्स्नक्षये कैवल्याभावादिति वचनादिति तद्व्यपोहार्थमाह—तीर्थंकरेभ्यस्तीर्यते संसारसमुद्रोऽनेनेति तीर्थं तच्च प्रवचनाधारश्चतुर्विधसङ्घः प्रथमगणधरो वा ; यदाहुः—[1]तित्थं भन्ते ! तित्थं तित्थयरे तित्थं गोयमा ! अरिहा ताव नियमा तित्थंकरे तित्थं पुण चाउवण्णे समणसंघे पढमगणहरे वा, तत्करणशीलास्तीर्थंकराः । न चाकृत्स्नक्षये कैवल्यं न भवति, घातिकर्मक्षये अघातिकर्मभिः कैवल्यस्याबाधनात् । एवं ज्ञानकैवल्ये तीर्थंकरत्वमुपपद्यते, मुक्तकैवल्ये तु तीर्थंकरत्वमस्माभिरपि नेष्यते । एतेऽपि सदा शिवानुग्रहात् कैश्चिद्बोधवन्त इष्यन्ते, यदाह—महेशानुग्रहाद् बोधनियमाविति तन्निराकरणार्थमाह—स्वयंसंबुद्धेभ्यः स्वयमात्मना तथा-

(१) तीर्थं भगवन् ! तीर्थं तीर्थंकरस्तीर्थं गौतम ! अर्हंस्तावन्नियमात् तीर्थंकरस्तीर्थं पुनश्चतुर्वर्णः श्रमणसङ्घः प्रथमगणधरो वा ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

भव्यत्वादिसामग्रीपरिपाकात्र तु परोपदेशात् सम्यगविपर्ययेण बुद्धा अवगततत्त्वाः स्वयंसंबुद्धास्तेभ्यः। यद्यपि भवान्तरेषु तथाविधगुरुसन्निधानायत्तबोधास्तेऽभूवन्, तथापि तीर्थकरजन्मनि परोपदेशनिरपेक्षा एव बुद्धाः, यद्यपि च तीर्थकरजन्मन्यपि लोकान्तिकविदग्धवचनात् '[1]भयवं तित्थं पवत्तेह' इत्येवंलक्षणाद् दीक्षां प्रतिपद्यन्ते, तथापि वैतालिकवचनानन्तरप्रवृत्तनरेन्द्रयात्रावत् स्वयमेव प्रव्रज्यां प्रतिपद्यन्ते। इदानीं स्तोतव्यसम्पद् एव हेतुविशेषसम्पदुच्यते—पुरिसोत्तमाणं पुरिससीहाणं पुरिसवरपुण्डरीआणं पुरिसवरगन्धहत्थीणं—पुरि शरीरे शयनात् पुरुषा विशिष्टकर्मोदयादिशिष्टसंस्थानवत्शरीरवासिनः सत्त्वास्तेषामुत्तमाः सहजतथाभव्यत्वादिभावतः श्रेष्ठाः पुरुषोत्तमाः; तथाहि—आसंसारमेते परार्थव्यसनिन उपसर्जनीकृतस्वार्था उपचितक्रियावन्तोऽदीनभावाः सफलारम्भिणो दृढानुशयाः कृतज्ञतापतयोऽनुपहतचित्ता देवगुरुबहुमानिनो गम्भीराशया इति। न खल्वसमारचितमपि जात्यरत्नं समानमितरेण। न च समारचितोऽपि काचादिर्जात्यरत्नीभवति। एवं च यदाहुः सौगताः—नास्तीह कश्चिदभाजन सत्त्व इति, सर्वे बुद्धा भविष्यन्ति इति च; तत् प्रत्युक्तम्। एते च बाह्यार्थसंवादसत्यवादिभिः संस्कृताचार्यशिष्यैर्निरुपमानस्तवार्हा एवेष्यन्ते हीनाधिकाभ्यामुपमा मृषेति वचनात्तद्व्यवच्छेदार्थमाह—पुरुषसिंहेभ्यः पुरुषाः सिंहा इव प्रधानाः

---

(१) भगवंस्तीर्थं प्रवर्तयत।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

शौर्यादिगुणभावेन पुरुषसिंहाः, यथा सिंहाः शौर्यादिगुणयोगिनः तथा भगवन्तोऽपि कर्मशत्रून् प्रति शूरतया तदुच्छेदं प्रति क्रूरतया क्रोधादीन् प्रत्यसहनतया रागादीन् प्रति वीर्ययोगेन तपःकर्म प्रति वीरतया ख्याताः, तथा एषामवज्ञा परीषहेषु, न भयमुपसर्गेभ्यः, न चिन्ताऽपि इन्द्रियवर्गे, न खेदः संयमाध्वनि, न प्रकम्पो ध्याने, न चैवमुपमा मृषा तद्वारेण तदसाधारणगुणाभिधानादिति। एते च सुचारुशिष्येः सजातीयोपमायोगिन एवेष्यन्ते विजातीयेनोपमायां तत्सदृशधर्मापत्त्या पुरुषत्वाद्यभावप्राप्तिः। यदाहुः— ते विरुद्धोपमायोगे तद्धर्मापत्त्या तदवस्तुत्वमिति तद्व्यपोहायाह— पुरुषवरपुण्डरीकेभ्यः पुरुषा वरपुण्डरीकाणीव संसारजलासङ्गादिना धर्मकलापेन पुरुषवरपुण्डरीकाणि तेभ्यः, यथाहि पुण्डरीकाणि पङ्के जातानि जलेन वर्धितानि तदुभयं विहायोपरि वर्तन्ते प्रकृतिसुन्दराणि च भवन्ति निवासो भुवनलक्ष्म्याः, आयतनं चक्षुराद्यानन्दस्य प्रवरगुणयोगतो विशिष्टतिर्यग्नरामरैः सेव्यन्ते सुखहेतवो भवन्ति; तथा भगवन्तोऽपि कर्मपङ्के जाता दिव्यभोगजलेन वर्धिता उभयं विहाय वर्तन्ते, सुन्दराश्चातिशययोगेन निवासो गुणसम्पदः, हेतवः परमानन्दस्य केवलादिगुणभावेन तिर्यग्नरामरैः सेव्यन्ते निवृत्तिसुखहेतवश्च जायन्ते इति भिन्नजातीयोपमायोगेऽप्यर्थतो विरोधाभावेन यथोदितदोषाऽसम्भवः। यदि तु विजातीयोपमायोगेन तद्धर्मापत्तिरापाद्यते तर्हि सिंहादिसजातीयोपमायोगे तद्धर्माणां पशुत्वादीनामप्यापत्तिः स्यादिति। एतेऽपि यथोत्तरं गुणक्रमाभिधानवादिभिः सुरगुरो-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

र्विनेयैर्हीनगुणोपमापूर्वकमधिकगुणोपमार्हा इष्यन्ते अभिधान-क्रमाभावे अभिधेयमपि तद्वदक्रमवदसदितिवचनादेतन्निरासा-यात्र—पुरुषवरगन्धहस्तिभ्यः पुरुषा वरगन्धहस्तिन इव वरगजेन्द्रा इव पुरुषवरगन्धहस्तिनः यथा गन्धहस्तिनां गन्धेनैव तद्देशविहा-रिणः क्षुद्रगजा भज्यन्ते तद्वदिति परचक्रदुर्भिक्षमारिप्रभृतयः सर्व एवोपद्रवगजा भगवतामचिन्त्यपुण्यानुभावानां विहारपवनगन्धादेव भज्यन्ते, न चैवमभिधानक्रमाभावेऽभिधेयमपि क्रमवदसदिति वाच्यम्। सर्वगुणानामेकत्राऽन्योऽन्यसंवलितत्वेनावस्थानात्, तेषां यथारुचि स्तोत्राभिधाने न दोषः। एवं पुरुषोत्तमत्वादिना प्रका-रेण स्तोतव्यसम्पद एव हेतुविशेषसम्पत्तृतीया ।३। इदानीं स्तोत-व्यसम्पद एव सामान्येनोपयोगसम्पदमाह—लोगुत्तमाणं लोग-नाहाणं लोगहिआणं लोगपईवाणं लोगपज्जोअगराणं-समुदायेष्वपि प्रवृत्ताः शब्दा अनेकधा अवयवेष्वपि प्रवर्तन्ते इति न्यायाद्यद्यपि लोकशब्देन तत्त्वतः पञ्चास्तिकाया उच्यन्ते, धर्मादीनां वृत्ति-र्द्रव्याणां भवति यत्र तत् क्षेत्रं तैर्द्रव्यैः सह लोकस्तद्विपरीतं त्वलोकाख्यमिति वचनात्। तथापीह लोकशब्देन भव्यसत्त्वलोक एव परिगृह्यते, सजातीयोत्कर्ष एवोत्तमत्वोपपत्तेः। अन्यथा अभव्यापेक्षया सर्वभव्यानामप्युत्तमत्वात्तेषामतिशय उक्तः स्यात्। ततश्च भव्यसत्त्वलोकस्य सकलकल्याणनिबन्धनतया भव्यत्वभावे-नोत्तमा लोकोत्तमास्तेभ्यः, लोकनाथेभ्यः, इह लोकशब्देन बीजाधानादिना संविभक्तो रागाद्युपद्रवेभ्यो रक्षणीयो विशिष्टो भव्यलोकः परिगृह्यते अस्मिन्नेव नाथत्वोपपत्तेः, योगक्षेमकृन्नाथ

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

इति वचनात्, तदिह येषामेव बीजाधानोद्भेदपोषणैर्योगः, क्षेमं च तत्तदुपद्रवरक्षणेन ते एव भव्या लोकशब्देन गृह्यन्ते, न चैते योगक्षेमे सकलभव्यसत्त्वविषये कस्यचित्सम्भवतः सर्वेषामेव मुक्तिप्रसङ्गात्तस्मादुक्तस्यैव लोकस्य नाथा इति, तथा लोकहितेभ्यः, इह लोकशब्देन सकल एव सांव्यवहारिकादिभेदभिन्नः प्राणिवर्गो गृह्यते, तस्मै सम्यग्दर्शनप्ररूपणरक्षणयोगेन हिता लोकहिताः, तथा लोकप्रदीपेभ्यः, अत्र लोकशब्देन विशिष्ट एव देशनाद्यंशुभिर्मिथ्यात्वतमोऽपनयनेन यथाहं प्रकाशितज्ञेयभावः संज्ञिलोकः परिगृह्यते तं प्रत्येव भगवतां प्रदीपत्वोपपत्तेः। नह्यन्धं प्रति प्रदीपः प्रदीपो नाम। तदेवंविधं लोकं प्रति प्रदीपा लोकप्रदीपाः, तथा लोकप्रद्योतकरेभ्यः, इह लोकशब्देन विशिष्टचतुर्दशपूर्वविल्लोकः परिगृह्यते, तत्रैव तत्त्वतः प्रद्योतकरत्वोपपत्तेः, प्रद्योतं च सप्तप्रकारं जीवादिवस्तुतत्त्वं तत्प्रद्योतकरणञ्च विशिष्टानामेव पूर्वविदां भवति, तेऽपि षट्स्थानपतिता एव श्रूयन्ते, न च तेषां सर्वेषामपि प्रद्योतः सम्भवति, प्रद्योतो हि विशिष्टतत्त्वसंवेदनयोग्यता सा च विशिष्टानामेव भवति। तेन विशिष्टचतुर्दशपूर्वविल्लोकापेक्षया प्रद्योतकरा एवं लोकोत्तमत्वादिभिः पञ्चभिः प्रकारैः परार्थकरणाः स्तोतव्यसम्पदः सामान्येनोपयोगसम्पन्नचतुर्थी।४। इदानीमुपयोगसम्पद एव हेतुसंपदुच्यते। अभयदयाणं चक्खुदयाणं मग्गदयाणं सरणदयाणं बोहिदयाणं—इह अभयं सप्तधा इहपरलोका-ऽऽदाना-ऽकस्मादा-ऽऽजीव-मरण-श्लाघाभेदेनैतत्प्रतिपक्षतोऽभयं विशिष्टमात्मनः स्वास्थ्यं निःश्रेयसे धर्मभूमिकानिबन्धनभूतं

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

धृतिरित्यन्येषां तदित्थंभूतमभयं गुणप्रकर्षयोगादचिन्त्यशक्तियुक्तत्वात् सर्वथा परार्थकारित्वाद् भगवन्त एव ददतीत्यभयदास्तेभ्यः; तथा चक्षुर्देभ्यः, इह चक्षुर्विशिष्टमात्मधर्मरूपं तत्त्वावबोधनिबन्धनं गद्यते। तच्च श्रद्धेत्यन्येषां तद्विहीनस्याचक्षुष्मत इव वस्तुतत्त्वदर्शनायोगाद्, न च मार्गाऽनुसारिणी श्रद्धा सुखेनावाप्यते सत्यां चास्यां कल्याणचक्षुषो भवति वस्तुतत्त्वदर्शनम्, तदियं धर्मकल्पद्रुमस्यावन्ध्यबीजभूता भगवद्भ्य एव भवतीति चक्षुर्ददतीति चक्षुर्दाः; तथा मार्गदेभ्यः, इह मार्गो भुजङ्गमनलिकायामतुल्यो विशिष्टगुणस्थानावाप्तिप्रवणः स्वरसवाही त्रयोपशमविशेषोऽयमभिमन्ये सुखेत्याचक्षते अस्मिन्नसति न यथोचितगुणस्थानावाप्तिर्मार्गविषमतया चेतःस्खलनेन प्रतिबन्धोपपत्तेः, मार्गश्च भगवद्भ्य एवेति मार्गं ददतीति मार्गदाः; तथा शरणदेभ्यः, इह शरणं भयार्तत्राणं तच्च संसारकान्तारगतानामतिप्रबलरागादिपीडितानां समाश्वासनस्थानकल्पं तत्त्वचिन्तारूपमध्यवसानं विवदिषेत्यन्येषामस्मिंश्च सति तत्त्वगोचराः शुश्रूषा-श्रवण-ग्रहण-धारण-विज्ञानो-हाऽपोह-तत्त्वाभिनिवेशाः प्रज्ञागुणा भवन्ति। तत्त्वचिन्तामन्तरेण तेषामभावात् सम्भवन्ति तु तामन्तरेणाऽपि तदाभासा न पुनः स्वार्थसाधकत्वेन भावसाराः, तत्त्वचिन्तारूपं शरणं भगवद्भ्य एव भवतीति शरणं ददतीति शरणदाः; तथा बोधिदेभ्यः, इह बोधिर्जिनप्रणीतधर्मावाप्तिः, इयं पुनर्यथाप्रवृत्त-अपूर्व-अनिवृत्तिकरणत्रयव्यापाराभिव्यङ्ग्यमभिन्नपूर्वग्रन्थिभेदतः प्रशमसंवेगनिर्वेदानु-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कम्मास्तिक्याभिव्यक्तिलक्षणं तत्त्वार्थश्रद्धानं सम्यग्दर्शनमुच्यते विज्ञप्तिरित्यन्येषां पञ्चकमप्येतदपुनर्बन्धकस्य, पुनर्बन्धके यथोचितस्यास्याभावादेते च यथोत्तरं पूर्वपूर्वफलभूताः, तथा हि-अभयफलं चक्षुः, चक्षुःफलं मार्गः मार्गफलं शरणम्, शरणफलं बोधिः सा च भगवद्भ्य एव भवतीति बोधिं ददतीति बोधिदाः। एवमभयदानचक्षुर्दानमार्गदानशरणदानबोधिदानेभ्यो यथोदितोपयोगसिद्धेरुपयोगसम्पद एव हेतुसम्पदुक्ता; साम्प्रतं स्तोतव्यसम्पद एव विशेषोपयोगसम्पदुच्यते—धम्मदयाणं धम्मदेसयाणं धम्मनायगाणं धम्मसारहीणं धम्मवरचाउरन्तचक्कवट्टीणं—धर्मदेभ्यः, इह धर्मश्चारित्रधर्मो गृह्यते स च यति-श्रावकसम्बन्धिभेदेन द्वेधा यतिधर्मः सर्वसावद्ययोगविरतिलक्षणः; श्रावकधर्मस्तु देशविरतिरूपः, स चायमुभयरूपोऽपि भगवद्भ्य एव हेत्वन्तराणां सद्भावेऽपि भगवतामेव प्रधानहेतुत्वादिति धर्मं ददतीति धर्मदाः, धर्मदत्वं च धर्मदेशनाद्वारेणैव भवति नान्यथेत्याह—धर्मदेशकेभ्यः, धर्मं प्रस्तुतं यथाभव्यमवन्ध्यतया देशयन्तीति धर्मदेशकाः, तथा धर्मनायकेभ्यः, धर्मोऽधिकृत एव तस्य नायकाः स्वामिनस्तद्वशीकरणभावात् तदुत्कर्षाऽवाप्तेस्तत्प्रकृष्टफलभोगात् तद्व्याघातानुपपत्तेश्च धर्मनायकाः, तथा धर्मसारथिभ्यः प्रस्तुतस्य धर्मस्य स्वपरापेक्षया सम्यक्प्रवर्तनपालनदमनयोगतः सारथयो धर्मसारथयः, तथा धर्मवरचतुरन्तचक्रवर्तिभ्यः, धर्मः प्रस्तुतः स एव त्रिकोटिपरिशुद्धितया सुगतादिप्रणीतधर्मचक्रापेक्षया उभयलोकहितत्वेन चक्रवर्त्यादिचक्रापेक्षया च वरं प्रधानं

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

चतसृणां गतीनां नारकतिर्यग्नरामरलक्षणानामन्तो यस्मात् तच्चतुरन्तं चक्रमिव चक्रं रौद्रमिथ्यात्वादिभावशचुलवनात्तेन वर्तन्ते इत्येवंशीला धर्मवरचतुरन्तचक्रवर्तिनः चाउरन्तेति सम्पृङ्ग्रादित्वादात्वमेवं धर्मदत्वादिभिः पञ्चभिः स्तोतव्यसम्पदेव विशेषोपयोगसम्पदुक्ता । ६ । इदानीं

सर्वं पश्यतु वा मा वा तत्त्वमिष्टं तु पश्यतु ।

कीटसंख्यापरिज्ञानं तस्य नः क्वोपयुज्यते ? ॥ १ ॥ इति सर्वदर्शनप्रतिक्षेपेणेष्टतत्त्वदर्शनवादिनः सौगतान् प्रतिक्षिपति-अप्पहडिहयवरनाणदंसणधराणं विअट्टछउमाणं—अप्रतिहते सर्वत्राऽप्रतिस्खलिते वरे क्षायिकत्वात् प्रधाने ज्ञानदर्शने विशेषसामान्यावबोधरूपे धारयतीति अप्रतिहतवरज्ञानदर्शनधरास्तेभ्यः, अप्रतिहतवरज्ञानदर्शनधरत्वं च निरावरणत्वेन सर्वज्ञानदर्शनस्वभावतया च, ज्ञानग्रहणं चादौ सर्वा लब्धयः साकारोपयोगोपयुक्तस्येति ज्ञापनार्थमिति । एते च कैश्चित्तत्त्वतः खल्वव्याहतच्छद्मान एवेष्यन्ते यदाह—

ज्ञानिनो धर्मतीर्थस्य कर्तारः परमं पदम् ।
गत्वा गच्छन्ति भूयोऽपि भवं तीर्थनिकारतः ॥ १ ॥

तथा—

दग्धेन्धनः पुनरुपैति भवं प्रमथ्य
निर्वाणमप्यनवधारितभीरुनिष्ठम् ।
मुक्तः स्वयं कृतभवश्च परार्थशूर-
स्त्वच्छासनप्रतिहतेष्विह मोहराज्यम् ॥ १ ॥ इति ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तन्निवृत्त्यर्थमाह—व्यावृत्तच्छद्मभ्यः, छादयतीति छद्म ज्ञानावरणादिघातिकर्म तद्बन्धयोग्यतालक्षणो भवाधिकारश्च, व्यावृत्तं निवृत्तं छद्म येभ्यस्ते तथाविधाः, नाऽक्षीणे संसारे अपवर्गः क्षीणे च जन्मपरिग्रह इत्यसत्, हेत्वभावात्। न च तीर्थनिकारजन्मपराभवो हेतुस्तेषां मोहाभावाद् मोहे वा अपवर्ग इति प्रलापमात्रमेवमप्रतिहतवरज्ञानदर्शनधरत्वेन व्यावृत्तच्छद्मतया च स्तोतव्यसम्पद एव सकारणा स्वरूपसम्पत्। एते च कल्पिता विद्यावादिभिः परमार्थतो जिनादय एवेष्यन्ते भ्रान्तिमात्रमसद्विद्येति वचनात् एतद्व्यपोहाय आह—जिणाणं जावयाणं रागादिजेतृत्वाज्जिनाः, न च रागादीनामसत्त्वं प्रतिप्राण्यनुभवसिद्धत्वात्। न चाऽनुभवोऽपि भ्रान्तः सुखदुःखाद्यनुभवेष्वपि भ्रान्तिप्रसङ्गात्, एवं च जेयसम्भवाज्जिनत्वमविरुद्धम्। एवं रागादीनेव सदुपदेशादिना जापयन्तीति जापकाः तेभ्यः, एतेऽपि कालकारणवादिभिरनन्तशिष्यैर्भावतोऽतीर्णादय एवेष्यन्ते काल एव कृत्स्नं जगदावर्तयति इति वचनात् एतन्निरासायाह—तिण्णाणं तारयाणं—सम्यग्ज्ञानदर्शनचारित्रपोतेन भवार्णवं तीर्णवन्तः तीर्णाः, न चैषां तीर्णानां पारगतानामावर्तः सम्भवति तद्भावे मुक्त्यसिद्धेः, एवं च न मुक्तः पुनर्भवे भवतीति तीर्णत्वसिद्धिः, एवं तारयन्ति अन्यानपीति तारकास्तेभ्यः, एतेऽपि परोक्षज्ञानवादिभिर्मीमांसकभेदैरबुद्धादय एवेष्यन्ते अप्रत्यक्षा हि नो बुद्धिः प्रत्यक्षोऽर्थः इति वचनात् एतद्व्यवच्छेदार्थमाह—बुद्धाणं बोहयाणं—अज्ञाननिद्राप्रसुप्ते जगत्यपरोपदेशेन जीवाजीवादिरूपं तत्त्वं स्वसंविदितेन ज्ञानेन बुद्धवन्तो

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

बुद्धाः, न चास्वसंविदितेन ज्ञानेनार्थज्ञानं सम्भवति। न ह्यदृष्टप्रदीपो बाह्यमर्थं प्रत्यक्षीकरोति, न चेन्द्रियवदस्वसंविदितस्याऽपि ज्ञानस्यार्थप्रत्यक्षीकरणमिन्द्रियस्य भावेन्द्रियत्वात् तस्य च स्वसंविदितरूपत्वात्

यदाह—

अप्रत्यक्षोपलम्भस्य नार्थदृष्टिः प्रसिद्ध्यति ॥

एवं च सिद्धं बुद्धत्वमेवमपरानपि बोधयन्तीति बोधकास्तेभ्यः, एतेऽपि जगत्कर्तृलीनमुक्तवादिभिः सन्तपनविनेयैस्तत्त्वतोऽमुक्तादय एवेष्यन्ते, ब्रह्मवद् ब्रह्मसङ्गतानां स्थितिरिति वचनात् एतन्निराचिकीर्षयाऽऽह—मुत्ताणं मोअगाणं—चतुर्गतिविपाकचित्रकर्मबन्धमुक्तत्वान् मुक्ताः कृतकृत्या निष्ठितार्था इत्यर्थः, न च जगत्कर्तरि लये निष्ठितार्थत्वं सम्भवति, जगत्करणेन कृतकृत्यत्वायोगात् हीनादिकरणे च रागद्वेषाऽनुषङ्गः, न चान्यत्राऽन्यस्य लयः सम्भवति एकतराभावप्रसङ्गात् एवं च जगत्कर्तरि लयाभावाद् मुक्तत्वसिद्धिः, एवं मोचयन्त्यन्यानपीति मोचकास्तेभ्यः, एवं च जिनत्वजापकत्वतीर्णत्वतारकत्वबुद्धत्वबोधकत्वमुक्तत्वमोचकत्वैः स्वपरहितसिद्धेरात्मतुल्यफलकर्तृत्वं सम्यदृष्टमो ।८। एतेऽपि बुद्धियोगज्ञानवादिभिः कापिलैरसर्वज्ञा असर्वदर्शिन एवेष्यन्ते बुद्ध्यध्यवसितमर्थं पुरुषश्चेतयते इति वचनात् एतन्निराकरणायाह—सव्वन्नूणं सव्वदरिसीणं—सर्वं जानन्तीति सर्वज्ञाः सर्वं पश्यन्तीत्येवंशीलाः सर्वदर्शिनः तत्स्वभावत्वे निरावरणत्वात्

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

उक्तञ्च—

स्थितः शीतांशुवज्जीवः प्रकृत्या भावशुद्धया।
चन्द्रिकावच्च विज्ञानं तदावरणमभ्रवत् ॥ १ ॥

न करणाभावे कर्ता तत्फलसाधक इत्यप्यनैकान्तिकम्, परनिष्ठितप्लवकस्य तरण्डकाभावेऽपि प्लवनदर्शनात् इति बुद्धिलक्षणं करणमन्तरेणाऽपि आत्मनः सर्वज्ञत्वसर्वदर्शित्वसिद्धिः। अन्यस्त्वाह—ज्ञानस्य विशेषविषयत्वाद् दर्शनस्य च सामान्यविषयत्वात्, तयोः सर्वार्थविषयत्वमयुक्तं तदुभयस्य सर्वार्थविषयत्वादित्युच्यते नहि सामान्यविशेषयोर्भेद एव, किन्तु ते एव पदार्थाः समविषमतया संप्रज्ञायमानाः सामान्यविशेषशब्दाभिधेयतां प्रतिपद्यन्ते ततश्च ते एव ज्ञायन्ते ते एव दृश्यन्ते इति युक्तं ज्ञानदर्शनयोः सर्वार्थविषयत्वमिति। ननु ज्ञानेन विषमताधर्मविशिष्टा एव गम्यन्ते न समताधर्मविशिष्टा अपि दर्शनेन च समताधर्मविशिष्टा एव गम्यन्ते न विषमताधर्मविशिष्टा अपि। ततश्च ज्ञानदर्शनाभ्यां समताविषमतालक्षणधर्मद्वयाऽग्रहणादयुक्तमेव तयोः सर्वार्थविषयत्वमिति न, धर्मधर्मिणोः सर्वथाभेदानभ्युपगमात्। ततश्चाभ्यन्तरीकृतसमताख्यधर्माण एव विषमताधर्मविशिष्टा ज्ञानेन गम्यन्ते अभ्यन्तरीकृतविषमताख्यधर्माण एव समताधर्मविशिष्टा दर्शनेन गम्यन्ते इति ज्ञानदर्शनयोर्नाऽसर्वार्थविषयत्वमिति सर्वज्ञाः सर्वदर्शिनश्च तेभ्यः। एते च सर्वगतात्मवादिभिर्मुक्तत्वे सति न नियतस्थानस्था एवेष्यन्ते। यदाहुस्ते—"मुक्ताः सर्वत्र तिष्ठन्ति व्योमवत्तापवर्जिताः" इति।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तन्निराकरणार्थमाह—सिवमयलमरुअमणंतमक्खयमव्वाबाहमपुणरावित्ति सिद्धिगइनामधेयं ठाणं संपत्ताणं—शिवं सर्वोपद्रवरहितत्वात्, अचलं स्वाभाविकप्रायोगिकचलनक्रियारहितत्वात्, अरुजं व्याधिवेदनारहितं तन्निबन्धनयोः शरीरमनसोरभावात्, अनन्तमनन्तज्ञानविषयत्वयुक्तत्वात्, अक्षयं विनाशकारणाभावात्, अव्याबाधमकर्मत्वात्, अपुनरावृत्तिः, न पुनरावृत्तिः संसारेऽवतारो यस्मात् सिद्धिगतिनामधेयं सिद्ध्यन्ति निष्ठितार्था भवन्त्यस्यां जन्तव इति सिद्धिर्लोकान्तक्षेत्रलक्षणा सैव गम्यमानत्वाद्गतिः, सिद्धिगतिरेव नामधेयं यस्य तत्तथा, स्थानं तिष्ठन्त्यस्मिन्निति स्थानं व्यवहारतः सिद्धिक्षेत्रम्। यदाहुः—[1]इह बुन्दिं चइत्ता णं तत्थगंतूण सिज्झइ इति। निश्चयतस्तु स्वस्वरूपमेव सर्वे भावा आत्मभावे तिष्ठन्तीति वचनात्, विशेषणानि च निरुपचरितत्वेन यद्यपि मुक्तात्मन्येव भूयसा सम्भवन्ति तथापि स्थानस्थानिनोरभेदोपचारादेवं व्यपदेशः, तदेवंविधं स्थानं सम्प्राप्ताः सम्यगशेषकर्मविच्युत्या स्वरूपगमनेन परिणामान्तरापत्त्या प्राप्तास्तेभ्यः, न हि विभूनामेवंविधप्राप्तिसम्भवः, सर्वगतत्वे सति सदैकस्वभावत्वात्, नित्यानां चैकरूपतया अवस्थानं तद्भावाव्ययस्य नित्यत्वात्। अतः क्षेत्रतोऽसर्वगतपरिणामिनामेवैवं प्राप्तिः सम्भवति, अत एव कायप्रमाणमात्रेति सुस्थितं वचनं तेभ्यो नम इति क्रियायोगः एवंभूता एव प्रेक्षावतां नमस्कारार्हा आद्यन्तसङ्गतश्च नमस्कारो

---

(१) इह शरीरं त्यक्त्वा तत्र गत्वा सिध्यति।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मध्यव्यापीति जितभया अप्येते एव नान्ये इति प्रतिपादयितुमुपसंहरन्नाह—नमो जिणाणं जिअभयाणं—नमो जिनेभ्यो जितभयेभ्य इति तदेवं सव्वन्नूणं सव्वदरिसीणमित्यत आरभ्य नमो जिणाणं जिअभयाणमित्येवमन्तैस्त्रिभिरालापकैः प्रधानगुणाऽपरिच्चयप्रधानफलावाप्तिरूपा सम्पन्नवमी ।९। अत्र स्तुतिप्रस्तावान्न पौनरुक्त्यशङ्का करणीया। यदाह—

[1]सज्झाय-ज्झाण-तव-ओसहेसु उवएस थुइ-पयाणेसु।
सत्तगुणकित्तणेसु य न होन्ति पुणरुत्तदोसा ओ॥ १॥

एताभिर्नवभिः सम्पद्भिः प्रणिपातदण्डक उच्यते, तत्पाठानन्तरं प्रणिपातकरणाज्जिनजन्मादिषु स्वर्विमानेषु तीर्थप्रवृत्तेः पूर्वमपि शक्रोऽनेन भगवतः स्तौतीति शक्रस्तवोऽप्युच्यते, अयञ्च प्रायेण भावार्हद्विषयो भावार्हदध्यारोपाच्च स्थापनार्हतामपि पुरः पठ्यमानो न दोषाय प्रणिपातदण्डकानन्तरं चाऽतीतानागतवर्तमानजिनवन्दनार्थं केचिदेतां गाथां पठन्ति—

[2]जे अ अईआ सिद्धा जे अ भविस्संति णागए काले।
संपइ अ वट्टमाणा सव्वे तिविहेण वंदामि॥ १॥

सुगमा चेयम्। ततश्चोत्थाय स्थापनार्हद्वन्दनार्थं जिनमुद्रया अरिहंतचेइयाणमित्यादिसूत्रं पठति। अर्हतां पूर्वोक्तस्वरूपाणां

---

(१) स्वाध्याय-ध्यान-तप-औषधेषूपदेश-स्तुति-प्रदानेषु।
सद्गुणकीर्तनेषु च न भवन्ति पुनरुक्तदोषास्तु॥ १॥

(२) ये चातीताः सिद्धा ये च भविष्यन्त्यनागते काले।
सम्प्रति च वर्तमानाः सर्वान् त्रिविधेन वन्दे॥ २॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

चैत्यानि प्रतिमालक्षणानि अर्हच्चैत्यानि—चित्तमन्तःकरणं तस्य भावः कर्म वा वर्णदृढादित्वात् ष्यञि चैत्यं बहुविषयत्वे चैत्यानि तत्राऽर्हतां प्रतिमा हि प्रशस्तसमाधिचित्तोत्पादकत्वादर्हच्चैत्यानि भण्यन्ते तेषां किं वन्दनादिप्रत्ययं कायोत्सर्गं करोमीति सम्बन्धः—कायस्य शरीरस्य उत्सर्गः कृताकारस्य स्थानमौनध्यानक्रियाव्यतिरेकेण क्रियान्तराध्याससमधिकृत्य परित्यागस्तं करोमि। वंदणवत्तिआए—वन्दनप्रत्ययं वन्दनमभिवादनं प्रशस्तकायवाङ्मनःप्रवृत्तिरित्यर्थः तत्प्रत्ययं तन्निमित्तं कथं नाम कायोत्सर्गादेव मम वन्दनं स्यादिति वत्तिआए इत्यार्षत्वात्सिद्धमेवं सर्वत्र द्रष्टव्यम्। तथा पूअणवत्तिआए-पूजनप्रत्ययं पूजननिमित्तं पूजनं गन्धमाल्यादिभिरभ्यर्चनम्, तथा सक्कारवत्तिआए-सत्कारप्रत्ययं सत्कारनिमित्तं सत्कारः प्रवरवस्त्राभरणादिभिरभ्यर्चनम्, ननु च यतेः पूजनसत्कारावनुचितौ द्रव्यस्तवत्वात्; श्रावकस्य तु साक्षात्पूजासत्कारकर्तुः कायोत्सर्गद्वारेण तत्प्रार्थना निष्फला, उच्यते, साधोर्द्रव्यस्तवप्रतिषेधः करणमधिकृत्य न पुनः कारणानुमतौ, यत उपदेशदानतः कारणसद्भावो भगवतां च पूजासत्कारदर्शनात् प्रमोदेनानुमतिरपि।

यदाह—

[1]सुव्वइअवइररिसिणा कारवणं पि अ अणुट्ठियमिमस्स।
वायगगन्थेसु तहा आगया देसणा चेव ॥ १ ॥

---

(१) सुव्रतिकयज्ज्वर्षिणा कारणमपि चानुष्ठितमस्य।
वाचकग्रन्थेषु तथा आगता देशना चैव ॥ १ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

श्रावकस्तु सम्पादयन्नपि एतौ भावातिशयादधिकसम्पादनार्थं पूजासत्कारौ प्रार्थयमानो न निष्फलारम्भः, तथा सम्माणवत्तिआए-सम्मानप्रत्ययं सम्माननिमित्तं सम्मानः स्तुत्यादिभिर्गुणोन्नतिकरणं मानसप्रीतिविशेष इत्यन्ये; अथ वन्दनादयः किंनिमित्त-मित्याह—बोहिलाभवत्तिआए-बोधिलाभोऽर्हत्प्रणीतधर्मावाप्तिस्तत्-प्रत्ययं तन्निमित्तं बोधिलाभोऽपि किंनिमित्तमित्याह—निरुव-सग्गवत्तिआए-जन्माद्युपसर्गाभावेन निरुपसर्गो मोक्षस्तत्प्रत्ययं तन्निमित्तं ननु साधुश्रावकयोर्बोधिलाभोऽस्त्येव तत्किं सतस्तस्य प्रार्थनया बोधिलाभमूलो मोक्षोऽप्यनभिलषणीय एव, उच्यते क्लिष्टकर्मोदयवशेन बोधिलाभस्य प्रतिपातसम्भवाद् जन्मान्तरे च तस्यार्थ्यमानत्वान्निरुपसर्गोऽपि तद्द्वारेण प्रार्थ्यत एवेति युक्तोऽनयो-रुपन्यासः; अयं च कायोत्सर्गः क्रियमाणोऽपि श्रद्धादिविकलस्य नाभिलषितार्थप्रसाधनायाऽलमित्याह—सद्धाए मेहाए धिईए धार-णाए अणुप्पेहाए वड्ढमाणीए ठामि काउसग्गं—श्रद्धा मिथ्यात्व-मोहनीयकर्मक्षयोपशमादिजन्योदकप्रसादकमणिवच्चेतसः प्रसाद-जननी तया श्रद्धया न तु बलाभियोगादिना, एवं मेधया न जडत्वेन मेधा च सच्छास्त्रग्रहणपटुः पापश्रुताऽवज्ञाकारी ज्ञानाव-रणीयक्षयोपशमजश्चित्तधर्मः, अथवा मेधया मर्यादावर्तितया नाऽसमञ्जसत्वेन एवं धृत्या मनःसमाधिलक्षणया न रागद्वेषाद्या-कुलतया एवं धारणया अर्हद्गुणाविस्मरणरूपया न तु तच्छून्य-तया एवमनुप्रेक्षयाऽर्हद्गुणानामेव मुहुर्मुहुरनुस्मरणेन, न तदेकत्वेन वर्धमानतयेति श्रद्धादिभिः प्रत्येकमभिसम्बध्यते श्रद्धादीनां क्रमो-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पन्यासो लाभापेक्षया श्रद्धायां हि सत्यां मेधा तद्भावे धृतिस्ततो धारणा तदन्वनुप्रेक्षा दृढिरभ्यासामेव। तिष्ठामि करोमि कायोत्सर्गं ननु प्राक्करोमि कायोत्सर्गमित्युक्तं साम्प्रतं तिष्ठामीति किमर्थमुच्यते ?, सत्यं सत्सामीप्ये सदवत्ययो भवतीति करोमि करिष्यामि इति क्रियाऽभिमुख्यं पूर्वमुक्तमिदानीं त्वासन्नतरत्वात् क्रियाकालनिष्ठाकालयोः कथञ्चिदभेदात् तिष्ठाम्येवाहमिति किं सर्वथा तिष्ठामि कायोत्सर्गं नेत्याह—अन्नत्थऊससिएणमित्यादिव्याख्यातं पूर्वं कायोत्सर्गश्चाष्टोच्छ्वासमात्रो न त्वत्र ध्येयनियमोऽस्ति कायोत्सर्गान्ते च यद्येक एव ततो नमो अरिहंताणमिति नमस्कारेण पारयित्वा यत्र चैत्यं वन्दनां कुर्वन्नस्ति तत्र यस्य भगवतः सन्निहितं स्थापनारूपं तस्य स्तुतिं पठति। अथ बहवस्तत एक एव स्तुतिं पठति, अन्ये तु कायोत्सर्गस्थिता एव शृण्वन्ति यावत् स्तुतिसमाप्तिः, ततः सर्वेऽपि नमस्कारेण पारयन्तीति तदनन्तरं तस्यामेवावसर्पिण्यां ये भारते वर्षे तीर्थकृतो अभूवन् तेषामेवैकक्षेत्रनिवासिनामासन्नोपकारित्वेन कीर्तनाय चतुर्विंशतिस्तवं पठति, पठन्ति वा।

तथा—

लोगस्स उज्जोअगरे धम्मतित्थयरे जिणे।
अरिहंते कित्तइस्सं चउवीसंपि केवली ॥ १ ॥

अरिहंत इति विशेष्यपदम् अर्हत उक्तनिर्वचनात्, कीर्तयिष्ये नामोच्चारणपूर्वकं स्तोष्ये, ते च राज्याद्यवस्थासु द्रव्यार्हन्तो भवन्तीति भावार्हत्त्वप्रतिपादनायाह—केवलिन उत्पन्नकेवल-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

2nd Edition) Vol. I. Fasc. 1 @ Rs. 1-4	...		
ṭika, Fasc. 2--6 @ /10/ each	...	..	..
pada-Ti[illegible]			
pradīpa Vol. I, Fasc. 1--8 ; Vol. II, Fasc. 1-4. @ /10/ e			
ṭīkā, Fasc. 1 @ /10/ each		..	...
sumāñjali Prakaraṇa Vol. II, Fasc.1--3 @ /10/ each			
ika Tatparya Parisudhi, Fasc. 1-2 @ /10/ each			...
...	...	...	...
...	...	...	...
Mawati, Fasc. 1--6 @ 2/ each	...	...	...
Prākrita-Paingalam, Fasc. 1--7 @ /10/ each		...	...
Parāçara Smṛti, Vol. I, Fasc. 2-8; Vol. II, Fasc. 1--6 ; Vol. III, Fasc. 1--6 @ /10/ each	...	...	...
Parāçara, Institutes of (English) @ 1/- each		...	...
Pariksamukha Sutram	...	...	...
Prabandhacintāmaṇi (English) Fasc. 1--3 @ 1/4/ each		...	...
Rasarnavam, Fasc. 1-3	...	...	...
Ravisiddhanta Manjari, Fasc. 1	...	...	...
Saddarsana-Samuccaya, Fasc. 1-2 @ /10/ each		...	...
Samaraicca Kaha Fasc. 1-5, @ /10/ each		...	...
Sāṅkhya Sūtra Vṛtti, Fasc. 1-4 @ /10/ each		...	...
Ditto (English) Fasc. 1-3 @ 1/- each			...
Six Buddhist Nyaya Tracts.	...	...	...
Srāddha Kriyā Kaumudī, Fasc. 1-6 @ /10/ each		...	...
Suçruta Saṁhitá, (Eng.) Fasc. 1 @ 1/- each		...	...
Suddhikaumudī, Fasc. 1-4 @ /10/ each		...	...
Sundaranandam Kavyam	...	...	...
Suryya Siddhanta Fasc. 1-2 @ 1-4 each		...	...
Syainika Sastra	...	...	...
*Taittreya Brahmana, Fasc. 11-25 @ /10/ each		...	...
*Taitterīya Saṁhitā, Fasc. 27-42 @ /10/ each		...	...
Tāṇḍya Brāhmaṇa, Fasc. 10-19 @ /10/ each		...	...
Tantra Vārteka (English) Fasc. 1-9, Vol II, Fasc. 2-10, Vol. III, Fasc. 1-2 @ 1/4/ each		...	...
*Tattva Cintāmaṇi, Vol. I, Fasc. 1--5, Part IV, Vol. II, Fasc. 1-12 @ /10/ each			
Tattva Cintamani Didhiti Vṛtti, Vol. I, Fasc, 1-6; Vol. II, Fc, 1, @ /10/ each			
Tattva Cintamani Didhiti [illegible]as, Fasc. 1-5, @ /10/ each			...
Tattvārthadhigama Sutram, Fasc. 1-3 @ /10/ each		...	...
Tirthacintamoni, Fasc. 1-3 @ /10/ each		...	...
Trikāṇḍa-Maṇḍanam, Fa[illegible] /10/ each		...	...
Tulsi Satsai, Fasc. 1--5		...	...
*Upamita-bhava-prapa[illegible]kathā, Fasc. 1-2, 5-13 @ /10/ each			...
Uvāsagadasāo, (Text & English) Fasc. 1--6 @ 1/- each			...
Vallāla Carita, Fasc [illegible] Fasc 1--6 @ /10/ each		...	...
Varṣa Kriyā Kaumu[illegible] Fasc. 3--6 ; Vol. II, Fasc. 1--7, @ /10/ each			...
*Vāyu Purāṇa, Vol. [illegible]. 1-8 Vol. II. Fasc. I @ /10/ each		...	...
Vidhāna Pārijata, [illegible]. II, Fasc. 2-5 @ 1/4/		...	...
Ditto [illegible]sc. 1--7 @ /10/ each		...	...
Vivādaratnākara [illegible]urāṇa, Fasc. 1--6 @ /10/ each		...	...
Vṛhat Svayambh[illegible] 1-3		...	...
Yogasāstra F[illegible]		...	...

Tibetan Series.

Amarkosha [illegible]aha, Vol. I	...	...	...
Baudhastotra[illegible] version of Kesarsaga, Fasc. 1--4 @ 1/- each		...	...
A Lower L[illegible]harmakirti, Fasc. 1	...	...	...
Nyayabindu, Fasc. 1--4 @ 1/- each	...	...	...
Pag-Sam [illegible]ag [illegible]khri S'iṅ (Tib. & Sans. Avadāña Kalpalatā Vol. I, Rtogs brj[illegible] Vol. II. Fasc. 1--10 @ 1/- each			...
Fasc. [illegible]ol. I, Fasc. 1-5 ; Vol. II, Fasc. 1-3 ; Vol. III, Fasc 1-6, @ 1/ each			
Sher-P[illegible]			

Arabic and Persian Series.

[illegible]n, or Shan Jahan Namah	...	...	...
Āmalsi (English) Vol. I, Fasc. 1--4 @ 1/- each		...	...
Al-Mrī, Fasc. 1-22 @ 1/8/ each	...	...	...
Āīn (English) Vol. II, Fasc. 1-5 Vol. III, Fasc. 1-5, Index to Vol. II, @ 2/- each	...	...	...
[illegible]mah, with Index, Fasc. 1--37 @ 1/8/ each	...	...	...
Akbarnamah, English Vol. I, Fasc. 1--8 ; Vol. II, Fasc. 1--7, Vol. III, Fasc. 1--2 @ 1/4/ each	...	...	...
Arabic Bibliography, by Dr. A. Sprenger, @ /10/	...	...	...
Catalogue of Syria, Fasc. 1-9 @ /10/ each	...	...	...
Catalogue of Arabic Books and Manuscripts, 1-2 @ 1/- each	...	...	...

The other Fasciculi of these works are out of stock and complete copies cannot be supplied.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

Dictionary of Arabic Technical Terms, and Appendix, Fasc. 1-21 @ 1/8/ eac		
Faras Nama, of Hashini		
Ditto of Zabardast Khan		
Farnang-i-Rashidi, Fasc. 1-14 @ 1/8/ each		
Fihrist-i-Tūsi. or, Ṭūsy's list of Shy'ah Books, Fasc. 1--4 @ 1/- each ..		
Gulriz		
Hadiqatu'L, Haqiqat, (Text & Eng.)	रु	नी
History of Gujarat	1	0
Haft Asmān, History of the Persian Masnawi, Fasc. 1 @ /12/ each ...	0	12
Hisātory of the Caliphs, (English) Fasc. 1--6 @ 1/4/ each	7	8
Iqālnamah-i-Jahāngirī, Fasc. 1--3 @ /10/ each	1	14
Iṣābah, with Supplement, 51 Fasc. @ 1/- each	51	0
Ma'āṣir-i-Raḥīmī, Part I, Fasc. 1--3 @ 2/ each	6	0
Maa'āṣir-ul-Umarā, Vol. I, Fasc. 1--9, Vol. II, Fasc. 1--9; Vol. III, 1-10; Index to Vol. I, Fasc. 10-11; Index to Vol. II, Fasc. 10-12; Index to Vol. III, Fasc. 11-14 @ /1/ each	35	0
Ditto (Eng.) Vol I, Fasc. 1--2, @ 1/4/ each	2	8
Memoirs of Tahmasp	1	0
Marhamu 'L-Ilali 'L-Mu'Dila Fasc. 1--2	2	0
Muntakhabu-t-Tawārikh, Fasc. 1--15 @ /10/ each	9	6
Ditto (English) Vol. I, Fasc. 1--7; Vol. II, Fasc. 1--5 and 3 Indexes, Vol. III, Fasc. 1 @ 1/ each ...	16	0
Muntakhabu-l-Lubāb, Fasc. 1--19 @ /10/ each	11	14
Ditto Part 3, Fasc. 1--2 @ 1/- each	1	0
Nukhbatu-l-Fikr, Fasc. 1 @ /10/	0	10
Niẓāmi's Khiradnāmah-i-Iskandari, Fasc. 1--2 @ /12/ each	1	8
Persian and Turki Divans of Bayran Khan, Khan Khanan	1	0
Qawaninu 's-Sayyad of Khuda Yar Khan 'Abbasi, edited in the original Persian with English notes by Lieut. Col. D. C. Phillott	5	0
Riyāzu-s-Salātīn, Fasc. 1--5 @ /10/ each	3	2
Ditto (English) Fasc. 1--5 @ 1/	5	0
Shah Alam Nama	1	14
Taḏhkira-i-khushnavīsān	1	0
Tubaqāt-i-Nāṣirī, (English), Fasc. 1-14 @ 1/- each	14	0
Ditto Index	1	0
Tārīkh-i-Fīrūz Shāhi of Ziyāu-d-dīn Barni Fasc. 1--7 @ /10/	4	6
Tārīkh-i-Fīrūzshāhi, of Shams-i-Sirāi Aif, Fasc. 1--6 @ /10/	3	12
Ten Ancient Arabic Poems, Fasc. 1--2 @ 1/8/ each	3	0
The Mabani 'L Lughat: A Grammar of the Turki Language in Persian ...	1	8
Tuzuk-i-Jahāngirī, (Eng.) Fasc. 1 @ 1/	1	0
Wis-o-Rāmīn, Fasc. 1--5 @ /10/ each	3	2
Zafarnāmah, Vol. I, Fasc. 1--9, Vol. II, Fasc. 1--8 @ /10/ each	10	10

ASIATIC SOCIETY'S PUBLICATIONS.

1.	Asiatic Researches. Vols. XX @ 10/ each	20	0
2.	Proceedings of the Asiatic Society from 1875 to 1899 (1900 904 are out of stock) @ /8/ per No. ...		
3.	Journal of the Assiatic Society for 1875 (8), 1871 (7), 1872 (8), 1873 (8), 1874 (8), 1875 (7), 1876 (7), 1877 (8), 1878 (8), 1879 (7), 1880 (8), 1881 (7), 1882 (6), 1883 (5), 1884 (6), 1885 (6), 1886 (8), 1887 (8), 1888 (7), 1889 (10), 1890 (11), 1891 (7), 1892 (8), 1893 (11), 1894 (8), 1895 (7), 1896 (8), 1897 (8), 1898 (8), 1899 (8), 1900 (7), 1901 (7), 1902 (9), 1903 (8), 1904 (16), @ 1/8 per No. to Members and @ 2/ per No. to Non-Members		
	N. B.—The figures enclosed in brakets give the number of Nos. in each V		
4.	Journal and Proceedings, N. S., 1905, to date, (Nos. 1-4 of 1905 are out of stock), @ 1-8 per No. to Members and Rs. 2 per No. to Non-Member		
5.	Memoirs, 1905, to date. Price varies from number to number. Discount of 25% to Members		
6.	Centenary Review of the Researches of the Society from 1784-1883 ...		
7.	Catalogue of the Library of the Asiatic Society, Bengal, 1910, ...		0
8.	Moore and Hewitson's Descriptions of New Indian Lepidoptera, Parts I--III, with 8 coloured Plates, 4to. @ 6/ each		9 18
9.	Kaçmiraçabdāmṛta, Parts I & II @ 1/8/		3
10.	Persian Translation of Haji Baba of Ispahan, by Haji Shaikh Ahmad-i-Kirmasi, and edited with notes by Major D. C. Phillott. ...		10

Notices of Sanskrit Manuscripts, Fasc. 1-34 @ 1/ each 34
Nepalese Buddhist Sanskrit Literature, by Dr. R. L. Mitra ... 5

N.B.—All Cheques, Money Orders, &c. must be made payable to the "Treasurer, Asiatic Society," only.

Books are supplied by V. P. P.

14-9-16.